923

॥ श्रीः ॥

(व्याकरण)

उत्तरपक्षावली ।

PUBLISHED BY H. D. GUPTA & SONS. PROPRIETORS,
THE CHOWKHAMBA SANSKRIT BOOK DEPOT.

BENARES CITY.

*Printed by Jai Krishna Das Gupta,
at the Vidya Vilas Press.*
BENARES.

1911

CHAMARAJENDRA SANSKRIT COLLEGE BANGALORE
चामराजेंद्र संस्कृत
H63
SGDF
Sri Gargeshwari Digital Foundation

SRI CHAMARAJENDRA SANSKRIT COLLEGE LIBRARY

BANGALORE

Accn. No. 1219

1. The maximum time allowed for retention of a book shall be one fortnight. It may be borrowed again if not required by others.

2. No reference books shall be lent out.

3. No borrower shall have more than two volumes out of the Library at one time.

4. Borrowers must not pass books from one to another but must return them to the Librarian.

5. Library books must not be used as class-books.

6. Any one who defaces by writing or otherwise damages any book shall pay the full cost of the book or of the entire works, if it consists of more than one volume.

7. The borrower shall be responsible for the value of the books lent out to him if they are lost, damaged or otherwise cannot be returned to the Library when they are due or recalled.

8. The presence of the voucher with the Librarian shall be considered sufficient proof of the non-return of books.

Class and No. H 61 82

1615-36 The Bangalore Press

SGDF
Sri Gurgeshwari Digital Foundation

RAJENDRA SANSKRIT COLLEGE LIBRARY
FORT, BANGALORE
82
H 61
1219

(उत्तरावल्याः)

सूचीपत्रम् ।

धातोस्तन्निमित्तस्य	१
इकोगुणवृद्धी	१
षात्पदान्तात्	१
ददातिदधात्योर्विभाषा	२
आर्द्धधातुकस्येड्वलादेः	८
व्यपदेशिवद्भावोऽप्रातिपदिकेन	१०
पूर्वत्राऽसिद्धम्	१०
स्त्रीप्रत्ययेचानुपसर्जने	११
ष्यङः संप्रसारणं	१२
पुत्रपत्योस्तत्पुरुषे	१२
इजादेश्च गुरुमतोऽनृच्छः	१३
अतोदीर्घोयञि	१४
ज्योतिरायुषः स्तोमः समासेऽङ्गुलेसङ्गः	१४
नुम्विसर्जनीय शर्व्यवायेऽपि	१४
प्राचांष्फस्तद्धितः	१५
घेर्ङिति	१७
इकोगुणवृद्धी	२१
क्ङिति च	२२
नलोपः प्रातिपदिकान्तस्य	२३

E-923

SGDF
Sri Gargeshwari Digital Foundation

तस्माच्छसोनः पुंसि	२३
हलङ्याभ्योदीर्घात्सुतिस्यपृक्तं हल्	२५
वदव्रजहलन्तस्याचः	२५
न पदान्ताट्टोरनाम्	२६
ङसिङसोश्च	२७
समः समि	२८
सार्वधातुकार्द्धधातुकयोः	२९
इदुदुपधस्यचाप्रत्ययस्य	३०
आडजादीनाम्	३२
भूवादयोधातवः	३४
अचः परस्मिन् पूर्वविधौ	३५

(इत्युत्तरपक्षावलि सूचीपत्रम् ।)

SGDF
Sri Gurgeshwari Digital Foundation

CHAMARAJENDRA SANSKRIT ... BANGALORE
चामराजेंद्र संस्कृत ...
1375
135

श्रीगणेशाय नमः ।

उत्तरपक्षावली प्रारभ्यते ।

विद्याविनोदचतुरं विद्यादं विघ्ननाशनम् ।
तथाविधं मन्नुदेवं गुरुं वाग्देवतां भजे ॥ १ ॥
प्रश्नावल्यां होरिलस्य ये प्रश्नाः पण्डितैः कृताः ।
तेषां सदुत्तरार्थाय क्रियां ह्युत्तरावली ॥ २ ॥

तत्र तावत् धातोस्तन्निमित्तस्येति किम् ओयते औयतेति मूलोक्तदोषनाशाय न यकीति न्यासः । तत्समाधानम् आचारक्विबन्तप्रकृतिककर्तृक्विबन्तगोग्लौशब्दादिभ्यः तत्र साधुरिति यति गोयं ग्लौयमित्यादि तथा विजन्तभूधातोर्भो इत्यस्माद्यति भोयमित्यादौ च धातोरेव यादिप्रत्ययभिन्नमित्यस्य वान्तादेशो माभूदिति न यकीति न्यासो दुष्टः ॥ इको गुणवृद्धी । वदव्रजेरिति । ओतश्श्यनीति । आदेच उपदेशसूत्रस्थभाष्यप्रामाण्यादेजन्तेभ्य आचाराक्विपोऽभावे तु भोयमित्यादाववश्यं दोषात् स दुष्ट एव । अतः अन्यत्समाधानं विभावयन्तु सुधिय इत्युक्तम् । तत्र समाधानान्तरमुक्तं भाष्याविरुद्धं तु धातोरित्यवयवषष्ठ्यैव उश्शम्भूस्तमिच्छति ऊयति आ ऊयति ओयति लङि औयदित्यादौ यथान्यासे न वान्तादेशः क्यजन्तधातोरवयवस्यैवैचो यादिप्रत्ययनिमित्तत्वाभावान्न यकीति न्यासे तु स्याद्दोषः । गव्यतिनाव्यति इत्यादौ तु व्यधिकरणषष्ठ्या चिन्त्यो वान्तादेशः यदि तन्निमित्तस्येत्यनेन यादिप्रत्ययभिन्ननिमित्त-

SGDF
Sri Gargeshwari Digital Foundation

तस्माच्छसोनः पुंसि २३
इलङ्याभ्योदीर्घात्सुतिस्यपृक्तं हल् २५
वदव्रजहलन्तस्याचः २५
न पदान्ताट्टोरनाम् २६
ङसिङसोश्च २७
समः सामि २८
सार्वधातुकार्द्धधातुकयोः २९
इदुदुपधस्यचाप्रत्ययस्य ३०
आडजादीनाम् ३२
भूवादयोधातवः ३४
अचः परस्मिन् पूर्वविधौ ३५

(इत्युत्तरपक्षावलि सूचीपत्रम् ।)

SGDF
Sri Gargeshwari Digital Foundation

CHAMARAJENDRA SANSKRIT
चामराजेंद्र संस्कृत
BANGALORE
463
1375
35

श्रीगणेशाय नमः ।

उत्तरपक्षावली प्रारभ्यते ।

विद्याविनोदचतुरं विद्यादं विघ्ननाशनम् ।
तथाविधं मन्नुदेवं गुरुं वाग्देवतां भजे ॥ १ ॥
प्रश्नावल्यां होरिलस्य ये प्रश्नाः पण्डितैः कृताः ।
तेषां सदुत्तरार्थाय क्रियां ह्युत्तरावली ॥ २ ॥

तत्र तावत् धातोस्तन्निमित्तस्येति किम् ओयते औयतेति मूलोक्तदोषनाशाय न यकीति न्यासः । तत्समाधानम् आचारक्विबन्तप्रकृतिककर्तृक्विबन्तगोग्लौशब्दादिभ्यः तत्र साधुरिति यति गोयं ग्लौयमित्यादि तथा विजन्तभूधातोर्भो इत्यस्माद्यति भोयमित्यादौ च धातोरेव यादिप्रत्ययभिन्नमित्यस्य वान्तादेशो माभूदिति न यकीति न्यासो दुष्टः ॥ इको गुणवृद्धी । वदव्रजेरिति । ओतश्श्यनीति । आदेच उपदेशसूत्रस्थभाष्यप्रामाण्यादेजन्तेभ्य आचाराक्विपोऽभावे तु भोयमित्यादाववश्यं दोषात् स दुष्ट एव । अतः अन्यत्समाधानं विभावयन्तु सुधिय इत्युक्तम् । तत्र समाधानान्तरमुक्तं भाष्यविरुद्धं तु धातोरित्यवयवषष्ठ्यैव उश्शम्भूस्तमिच्छति ऊयति आ ऊयति ओयति लङि औयदित्यादौ यथान्यासे न वान्तादेशः क्यजन्तधातोरवयवस्यैवैचो यादिप्रत्ययनिमित्तत्वाभावान्न यकीति न्यासे तु स्याद्दोषः । गव्यतिनाव्यति इत्यादौ तु व्यधिकरणषष्ठ्या चिन्त्यो वान्तादेशः यदि तन्निमित्तस्येत्यनेन यादिप्रत्ययभिन्ननिमित्त-

SGDF
Sri Gargeshwari Digital Foundation

स्यैवैचो वान्तादेशव्यावृत्तिरिष्येत तदा स्वाभाविकस्यैवैचो वान्तादेशे सिध्यति गव्यतीत्यादि सामान्यस्य व्यावृत्तौ तु न सिध्येदिति तत्त्वप्रकाशिकायां स्पष्टम् । अकित्तद्धितयोः इति न्यासे यादौ तद्धिते च वान्तादेशनिषेधे तु बाभ्रव्यं गव्यतीत्यादि न सिध्येत् न यकीति न्यासे ओयते इति न क्ङितीति न्यासे गव्यमित्यादि च न सिध्येत् । वान्तोयि प्रत्यये दृश्यते इति च कृते यद्वा यि प्रत्यये स्वरबहुलमिति कृते यान्तवान्तादेशा बाहुलका इति सिद्धौ बहूनां वान्तविधीनां वैय्यर्थ्ये तथापि लक्ष्यानुसरणक्लेश इति सुहृद्भूत्वाचार्यस्तथा न कृतवान् अत एव पाणिनीयानां क चित्स्वरक्यकार इत्यपात लक्षणस्य अस्मदाद्युद्देशेन कृतत्वात् एतल्लक्षैकचक्षुष्काणां तं विना लक्षणं लक्ष्यदर्शनमाशङ्क्य नासूया कर्तव्या यत्रानुगम इति भाष्यादननुगम एव लक्ष्यदर्शनं शरणं सति प्रामाण्य इति बोध्यम् । यत्तूक्तं वान्तो यीत्यस्य तत्सूत्रस्य भाष्यादधातुविषयकत्वाद्धातोरित्यारब्धमृषिणेति तद्धातुरित्येतत्सूत्रस्थभाष्यविरुद्धं निर्मूलं च तथा हि प्रकृतसूत्रे भाष्ये एवकारः किमर्थः नियमार्थः नैतदस्ति प्रयोजनं सिद्धे सत्यारभ्यमाण उत्तरेणैवकारं नियमार्थं भविष्यति इष्टतोऽवधारणार्थः तर्हि शङ्कव्यमित्यादौ यदि स्यादित्युक्तेः । यत्तु असिद्धं बहिरङ्गपारिभाषाया ऊठ्ग्रहणं ज्ञापकम् इति भाष्ये दूषणं दत्तम् ऊठ्ग्रहणं कथं ज्ञापकं प्रौहेत्यादौ विभक्त्युदात्तार्थं तदकरणे ऊठिदं पदाद्यप्पुम्रैद्युभ्यः पराऽसर्वनामस्थानविभक्तिरुदात्ता स्यादिति न प्रवर्तते इत्युक्तं तदिष्टापत्तेरदुष्टं वाहःस्थाने य ऊठ् तस्य तेन ग्रहणमिति तद्धाष्यतो लाभात् कथमन्यथा व्यूह इत्यादेरनभिधानमिति विभाव्य ज्वरत्वरेत्यादिविहिते ऊठि जूः जूरौ जूरः तूरेत्यात्तदावेव

SGDF
Sri Gargeshwari Digital Foundation

तत्प्रवृत्तेः तदुक्तं परिभाषेन्दुशेखरे प्रौह इत्याद्यसाध्वेव वृद्धेः प्राप्तेः अन्ये तु परिभाषाशयं विना न विधानं वर्णयन्ति उठिदमित्यत्र वाविदमेवास्तु कोऽर्थः अस्य दीर्घ ऊकारो यत्र वाशब्दस्य ह्रस्व उकारो यत्र ततः परा ऽसर्वनामस्था नविभक्तिरुदात्ता स्यादिति आद्यस्य जूरः जूरेत्यादि द्वितीयस्य विश्वौह इत्याद्युदाहरणं वश्च वाश्च वौ द्वन्द्वे कृते लोपो व्योरिति वलोपः उश्च ऊश्चेति दीर्घह्रस्वयो द्वन्द्वे कृते षष्ठीतत्पुरुषः ववास्थाने यौ दीर्घह्रस्वौ उकारौ ताभ्यां पराऽसर्वनामस्थानविभक्तिरुदात्तेति तदर्थः । वो इदमित्यत्रावादेशः इदमपि समाधानं संदिग्धं क्लिष्टं लोपो व्योरिति सूत्रस्थवकारप्रत्याख्यानपरभाष्यविरुद्धं चेत्यरुचेरुक्तं दीर्घोच्चारणमूठोऽस्यां परिभाषायां ज्ञापकं सम्प्रसारणे निमित्ते गुणे वृद्धिरेचीति वृद्धौ विश्वौह इत्यादिसिद्धेरिति तदपि चिन्त्यम् । दीर्घोच्चारणस्यैत्येधत्यूठ्स्विति विशेषणार्थत्वं शेखरे स्फुटं जनानवति इति जनौरित्याद्यर्थमुक्तत्वात् । ज्वरत्वरेत्यत्रापि ह्रस्वकरणे अक्षद्यूरित्याद्यसिद्धेः । एतेनोठिदमित्यत्रापि ह्रस्व एव पठ्यते तत्परास्तम् । किं च चतुरनुडुहो नद्यजादीत्यस्याग्रेवाह इति पठित्वा वाहःपरे नद्यजादी उदात्ते स्त इत्येव सिद्धे ऊठ्ग्रहणं व्यर्थमित्युक्त्वा वाहनद्या उदात्तविधानाद्वाह इति ङीब्विधिरपि नापूर्व इति भाष्याशयः । तस्यापि अन्तोदात्तादुत्तरपदादन्यतरस्यामनित्यसमास इत्यस्याग्रे पाठेन ज्ञापकपरभाष्यप्रामाण्येन तस्य व्यवस्थितविभाषापरत्वादिष्टसिद्धिरित्युक्तं तदपि न । वाह इत्युक्तं ऊठिदमित्यत्रोठोऽकरणे जूर इत्यादौ स्वरासिद्धिः । तत्रोठि कृते वाह इत्यस्यापि करणे वाह इति ङीब्विधिज्ञापकसिद्ध इति लाघवं यथायाति तथापि अनभिधानमेव शरणं तत्रापि कथमन्यथा

SGDF
Sri Gargeshwari Digital Foundation

वाहो ङीप् ज्ञापकादूङेति तर्क्यतां तस्यापि यूस्त्र्याख्याविति नदीत्वात् कथं वा श्रीमद्भिः प्रवाहैरित्यादौ परादिवद्भावेन वाह इत्यनेन प्राप्तः स्वरो बोधात् किं च तस्य बाह्यप्रयन्ते इत्यस्य वाह इत्यादौ त्वदुक्तव्यवस्थितविभाषाश्रयणं च प्रमाणं किं चोठः स्वरस्य विश्वौह इत्यादौ इष्टत्वज्ञापकपरिभाषाविरोध एवेति तत्स्वराभिधानस्य भाष्यकारानभिप्रेतत्वमेव लभ्यतइति दिक ॥ यत्तु विभक्तिश्चेति व्यर्थं प्रदेशे क चिद्यथायथं सुप्तिङ्ग्रहणेन चेष्टासिद्धेः । अष्टन इत्यत्र सुपीत्येवास्तु त्यदादीनाम इत्यत्र सुपीत्यनुवृत्तौ यत्र तत्रेत्यादावत्वं तु प्राग्दिशीयानां सुप्संज्ञयैव सिद्धे सुपि चेत्यत्र सुपि यभि इति न्यासेनैतर्हीत्यादौ अदोषः सुपो धातुप्रातिपदिकयोरिति सुपो लुक् सुप्पिताविल्यनुदात्तता च न त्रल्तसिलादीनां विधानसामर्थ्यात् त्रलादौ लित्करणाचेति विभावयन्तु सुधिय इत्युक्ततत्र विभक्तिसंज्ञा च लादौ प्रयोजनमिदमस्ति इदम इशादेशे उडिदमिति इदं स्वरेण तस उदात्तत्वमिति प्राग्दिशीय इत्यत्र भाष्ये स्पष्टं ततस्तृतीयद्वित्वमेतद्भाष्यगौरवादिति च कैय्यटे तत्र किं यदुक्तं त्रलादीनां सुप्सज्ञायां सुपो धात्विति लुङ् तेन विधानसामर्थ्यादिति तन्न । तद्धिते सति प्रातिपदिकसंज्ञा तस्यां च तद्धितलोप इति सन्निपातविघातादेवालुक्सामर्थ्येन अलुक्कर्तुमशक्यम् अव्ययसंज्ञायां तद्धितान्तात्सुपो लुक् एवं प्रयीजनसत्त्वात् तस्मादित्याद्यर्थे तदित्यादे प्रयोगफलस्य सत्त्वात् प्राग्दिशइत्यत्र कैय्यटे उक्तम् । ननु मध्ये ऽपवाद इति न्यायादनुदात्तौ सुप्पितावित्येवं स्वरं विभक्तिस्वरो बाधते न तु लित्स्वरं लित्स्वर एव तु परत्वाद्विभक्तिस्वरं बाधते नैष दोषः । ऊडिदमित्येतत्सूत्रं लितीत्यत्रानुवर्तते लित्स्वरंबाधित्वा विभक्तिस्वरो भवति तृतीयादिग्रहणेन तृतीयामारभ्य

SGDF
Sri Gargeshwari Digital Foundation

प्राग्यिशः प्रत्ययो गृह्यत इति किं च दानीमो मस्येत्संज्ञानिषेधाय विभक्तिसंज्ञेति स्पष्टं तत्र भाष्ये अन्यथा मिदच इत्यन्तादचः परं स्यादिति तत्र कैय्यटे स्पष्टं दानीमो ऽदन्तस्वीकारे दोषाभावे ऽप्युक्तस्थले तस उदात्तत्वफलं विभक्तिसंज्ञायाः प्रयोजनम् इति भाष्ये स्थितं प्राग्दिशीयानां सुप्संज्ञायां सुप्तिङ्तुस्मा इति दानीमो मस्येत्वं न ऊडिदमित्यत्रापि सुबेव संबध्यते सावेकाच इत्यत्रापि विभक्तिस्थाने सुपकरणादित्यदोष इति चेत्तर्हि अष्टाविवाचरति त्वाचारक्विबन्तादष्टन्शब्दाल्लटास्तिपि शपं बाधित्वा परत्वात्प्रतिपदोक्तत्वाद्विभक्तिग्रहणसामर्थ्याच्च नस्यात्वे ऽष्टातीति कृते तन्न स्यात् तस्मादष्टन इति विभक्तिग्रहणं कार्यं तसादीनां विभक्तिसंज्ञेष्टव्येति केचित् । अथ वा ऽष्टन आ सुप्तिङीत्येवास्तु तसादीनां सुपसंज्ञैवास्तु विभक्तिश्चेति न कार्यमित्यन्ये यदि विभक्तिश्चेत्यस्य प्रत्याख्यानेऽत एवाग्रहणं तर्हि अतिलाघवात्प्राग्दिशीयानां । माभूतां विभक्तिसुप्संज्ञे किं तु त्यदाद्यत्वफलाय त्यदादीनामप्राग्दिशीयतसादौ वेति पठ्यतां प्राग्दिशीयइति न कर्तव्यं सुपि यभीति च तथाष्टन इत्यत्र सुप्तिङेवास्तु दानीमो मस्य यथा नात्वं तथोक्तमेव इतइत्यन्तोदात्तस्तु तत्वप्रकाशिकायां स्पष्टं ३ घुणघूर्णभ्रमणे अत्रोपधायां चेति दीर्घे सिद्धे दीर्घोच्चारणं प्रक्रियालाघवार्थमिति शेखरग्रन्थः । स चायुक्तः मूर्च्छादिषु दीर्घाकरणे ऽत्र लेखकप्रमादेन दीर्घकरणात् ऊर्जेरपि दीर्घोच्चारणं तथैवोपधायां चेति सूत्रकरणएव लाघवादूर्णोतेर्नुलोपश्च महति ह्रस्वेति वचनादूकारस्यैव दीर्घ इत्यलम् । षात्पदान्तात् पदान्तात्षकारात्परस्य नस्य णत्वं नेत्यर्थः । निष्पानं दुष्पानम् । अत्र कृत्यच इति वा भावकरणयोरिति वा णत्वं प्राप्तम् । अत्र

SGDF
Sri Gargeshwari Digital Foundation

मनोरमायां पदान्तात्किं पुष्णातीति प्रत्युदाहृतं तदयुक्तं । ष्टुत्वेन सिद्धे रिति शङ्का तत्समाधानं तु रषाभ्यामिति सूत्रे भाष्ये वकारग्रहणमुत्तरार्थं षात्परस्य नस्य ष्टुत्वेन निर्वाहात् एवञ्च षात्पदान्तादित्यनेनापि ष्टुत्वस्यैव निषेधः पदान्तग्रहणाभावे पुष्णातीत्यत्र ष्टुत्वनिषेधे रूपासिद्धिः स्पष्टैवेति पण्डिताः । वस्तुतस्तु षग्रहणमुत्तरार्थमिति रषाभ्यामित्यत्र भाष्ये ऽदर्शनाद्बाध्यसामान्यचिन्तया पदान्तात्षात्परस्य नस्य णत्वमात्र निषिध्यत इत्यर्थः । न च षण्णामित्यत्रापि निषेधस्स्यादिति वाच्यम् । पदे ऽन्तः पदान्त इत्येव भाष्ये सुसर्पिष्केणेत्यादौ णत्वसिद्धये व्याख्यानात् पदस्थनकारस्यैव णत्वनिषेधात् एवञ्च पदान्तग्रहणाभावे सुसर्पिष्केणेति प्रत्युदाहर्तुमुचितमिति भाष्यदर्शिनः । न हि सुसर्पिष्केणेत्यत्र ष्टुत्वं लभ्यमिति दिक् ५ । ददातिदधात्योर्विभाषा । अनुपसर्गादेतयोर्विभाषा शः । श्याद्व्यधेति णस्यापवादः शपक्षे तु जुहोत्यादित्वाच्छपः श्लुः श्लाविति द्वित्वं ददः दधः पक्षे णः दायः धायः इति अनुपसर्गादित्येव प्रदः प्रधः इति मूल तत्र पण्डिताः इदं सूत्रं मास्तु । दद दाने दध धारणे आभ्यां पचाद्यच् ददः दध इति श्याद्व्यधेति णे युक्ति दायः धाय इति च सिद्धेरित्याशङ्क्य समाहितम् अचि कृते न ददः अददः अत्र नञ्तत्पुरुषे तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्या इत्यनेनाव्ययपूर्वपदप्रकृतिस्वर इष्यते तम्बाधित्वा अच्कावशक्तौ अजन्तं कान्तं चान्तोदान्तं स्यादशक्ताविच्यन्तोदात्तस्स्यादिति सूत्रम् इति । वस्तुतस्तु ससमासात्प्रागेवान्तरङ्गत्वादच्कावशक्तावित्यन्तोदात्ते निर्वृत्ते सति शिष्टत्वेनाव्ययपूर्वपदप्रकृतिस्वरः सिद्ध एव किं तु अभ्यस्तानामादिरित्याद्युदात्तार्थं प्रदधः प्रदधः इति व्यावृत्त्यर्थं

SGDF
Sri Gargeshwari Digital Foundation

दाञ्धाञोरपि ददद्धयोः सिद्ध्यर्थं च वचनं तदपि रूपद्वयम्वि-भाषाग्रहणं विनैवानुबन्धवैरूप्याद्वा सरूपसूत्रेण णशप्रत्ययाभ्यां सिद्धं विभाषाग्रयणं नानुबन्धकृतमसारूप्यमिति ज्ञापनार्थमि-ति वासरूपसूत्रे भाष्ये स्पष्टम् ६ चितः अन्त इत्यनुबर्त्तते चि-तो ऽन्त इत्यर्थः । अत्र वार्तिकम् चितः सप्रकृतेर्बह्वकजर्थमिति शेखरे अस्यार्थः चित्प्रत्ययप्रकृतेरन्त उदात्त इति तदर्थो न तु प्रत्ययमात्रस्यान्त इति अत्र चाकचाश्चित्वं ज्ञापकमन्यथाकच एकाच्कत्वेन प्रत्ययस्वरेणैवोदात्तत्वे सिद्धे तदर्थं व्यर्थं सदत्र ज्ञापकमिति तास्यनुदात्तेण्ङिदुपदेशाल्लसार्वधातुकमन्ह्विङोरि-त्यत्र शेखरे तु अस्मात्परं लसार्वधातुकमनुदात्तं न्हुङ्अधीङौ बर्ज्जयित्वेत्यर्थः रुणद्धीत्यत्र श्नमो मित्वेन परश्चेत्यस्य बाधे त-त्सन्नियोगशिष्टप्रत्ययाद्यु दात्तं बाधनमित्युक्तम् । अयं ग्रन्थः पर-स्परविरुद्धः । यथा मित्वेन परश्चेत्यस्य बाधे तत्सान्नियोगशि-ष्टप्रत्ययाद्युदात्तत्वस्यापि बाधः एवमकच्यपि प्राक्टेग्रहणेन प-रश्चेत्यस्त बाधे तत्सन्नियोगशिष्टप्रत्ययाद्युदात्तस्याप्राप्त्या ऽऽक-चश्चित्त्वस्य ज्ञापकतावर्णनमयुक्तमिति विरोधः । अत्र नवीनै-रित्थं परिहीयते उभयशब्दस्य सर्वादौ पाठो व्यर्थ इति प्रघट्टके भाष्यग्रन्थे ऽकश्चेदानीं काकचोः स्वरे रूपे वा विशेषो ऽस्ती-त्युक्त्वा ऽकचि सन्नियोगशिष्टन्यायस्याश्रयणे प्रमाणाभाव इत्य-न्यदपि विभातयन्तु सुधिय इति । यत्त्वत्रोक्तं । चितः स्थाने चित्प्रत्ययप्रकृतेरन्तोदात्त इति वार्त्तिकार्थस्तन्न । शोभनम् । अ-च्प्रभृतिप्रत्ययस्य कुण्डिनजादेरप्रत्ययस्य चेह ग्रहणमिति कैय-टविरोधात् बह्वकजर्थमिति प्रतीकमुपादाय बह्वकचो ऽन्तोदात्त-त्वे कार्य्ये चितः सप्रकृतेरिति वचनमिति कैयटविरोधाच्च बह्वक-च्प्रत्ययवती या प्रकृतिस्तस्या ऽन्त उदात्त इत्येवार्थो वार्त्तिक-

SGDF
Sri Gargeshwari Digital Foundation

स्य एतद्वार्तिकप्रत्याख्यानपरभाष्यप्रामाण्याच्चायमर्थः । तथा हि तत्तर्हि वक्तव्यं पूर्वसूत्रनिर्देशत्वात् चितइति भाष्यं चित्वात्समुदायो ऽन्तोदात्त इत्यर्थः । कुण्डिनजादयो ऽपि व्यपदेशिवद्भावाच्चिदन्ता उच्यन्तइति कैयटः चित इत्यनेन चित्वतो ऽग्रहणेऽकच एकाच्कत्वेन प्रत्ययस्वरेणैवान्तोदात्तत्वं सिद्धम् । तस्य चित्करणाच्चित्वत इत्यर्थो लभ्यते सप्रकृतेरिति बह्वकजर्थमुपादीयते तेन कुण्डिनप्रकृतिष्वदोष इत्युक्तम् । चित इत्यनेन चित्वतो ग्रहणे पुत्रकाम्यादिषु चित्प्रत्ययान्तेषूपयोगाभावेन बह्वकजर्थमित्युक्तम् । तथैवोदाहृतं च भाष्ये बह्वच् बहुभुक्तमित्यादि अकच् सर्वकैरुच्चकैरित्यादि च यतः शेखरयोर्विरोधो द्भावनं तत्र श्नमो मित्वेन परस्येत्यस्य बाधे ऽपि प्रत्यय इत्यस्य प्रकृतिरिष्यतएव प्रत्ययत्वं विना लशक्विति शस्येत्संज्ञानापत्तेः । प्रत्ययत्वे चाद्युदात्तः सन्नियोगशिष्टः केन वार्य्येत अकचि तु प्राक् टेर्ग्रहणात्परश्चेत्यस्य बाधे ऽकचः प्रकृतिप्रत्ययविशिष्टस्य प्रत्ययत्वे प्रामाण्यफलयोरभावाच्चित इत्यनेन चित्वतोः प्रकृतिप्रत्ययोरविशेषेण ग्रहणात्सन्नियोगशिष्टन्यायसंचारः काकदन्तपरीक्षावदाभातीति चित इति सूत्रे भाष्ये स्पष्टम् ७ आर्द्धधातुकस्येड्वलादेः ॥ अङ्गसंज्ञानिमित्तस्य वलादेरार्द्धधातुकस्येडितिसूत्रार्थः । अत्र शेखरे आर्द्धधातुकस्येति किम् जुगुप्सते इति अत्र सूत्रे भाष्ये ऋत इद्धातोरिति पदमुच्चार्य्य विहितस्य वलादेरिति व्याख्ययात्र दोषाभावादार्द्धधातुकग्रहणं प्रत्याख्यातम् । रुदादिभ्यः सार्वधातुकइति नियमादास्ते शेते इत्यादावदोष इति स्थितम् स्यासिचसीयुडित्यत्र भाष्ये तु अङ्गस्येट् माभूदित्यार्द्ध धातुके इत्यनुवर्त्त्य योगविभागमाश्रित्य यावानिट् स सर्वो ऽप्यार्द्ध धातुकस्योडित्युक्तम् । तत्परस्परविरुद्धं शेखरग्रन्थो ऽपि

SGDF
Sri Gargeshwari Digital Foundation

भाष्यविरुद्धः । अत्रेत्थं विरोधोद्धारं कुर्वन्ति पण्डिताः विधिसूत्रे प्रयोजनं नास्तीति प्रत्याख्यानं योगविभागार्थतया प्रयोजनोक्तिः जुगुप्सत इति शेखरग्रन्थस्तु आर्द्धधातुकग्रहणमनुवर्त्योक्त इति । अत्रेदं तत्त्वम् । स्यसिचूसीयुडिति सूत्रस्थं भाष्यं तावदेकदेशिसूत्रकाररीत्या प्रवृत्तम् एवं सप्तमे योगविभागः करिष्यते- आर्द्ध धातुकस्येट् यावानिट् नाम स सर्व आर्द्धधातुकस्यभवतीति विज्ञेयं ततो वलादेरिति वलादेरार्द्धधातुकस्येट् भवतीति भाष्यम् । आर्द्धधातुकस्य इत्यस्य प्रत्याख्याने योगविभागस्यैकदेश्युक्तत्वं स्फुटमेव शेखरोऽपियुक्तएव तथाहि आर्द्ध धातुकस्येति सूत्रे भाष्ये किमार्द्धधातुकस्येति पदाभावे वलादेरङ्गस्याप्रत्ययस्येडिति विप्रतिपत्ति कृत्वा यद्येतत्पदाभावे ऽङ्गस्येडापद्यते तत्पदसत्त्वेऽपि आर्द्धधातुकस्य यदङ्गं तस्येडित्यापादयितुं शक्यत्वात्तत्राक्रियमाणएवेष्टं विज्ञास्याम इत्युक्तम् । अनेन लक्ष्यशरणं सूत्रकारस्यापीति दर्शितम् । इदन्तर्हि प्रयोजनम् इह माभूत् आस्ते शेते एतदपि नास्ति प्रयोजनं रुदादिभ्यः सार्वधातुके इत्येतन्नियमार्थं भविष्यति रुदादिभ्य एव सार्वधातुके इड् भवति नान्येभ्य इति अत्र कैयटः सार्वधातुकएवेति नियमस्तु रुदविदेति क्त्वासनोः कित्त्वविधानान्न भविष्यति अनिट् सनो रुदादेर्हलन्ताच्चेति कित्त्वस्य सिद्धत्वात् क्त्वो ऽनिट् औपदेशिकाकित्त्वसद्भावादिति एवमपि वृक्षता अत्र प्राप्नोति धातोरिति वर्तते एवमपि लूभ्यां पूभ्यामत्र प्राप्नोति एवन्तर्हि विहितविशेषणं धातुग्रहणं धातोर्यो विहितः । ननु च धातोः एवायं विहितः । न चायं धातोरित्येवं विहितः क पुनर्धातुग्रहणं प्रकृतम् ऋत इद्धातोरिति तद्वै षष्ठीनिर्दिष्टं पञ्चमीनिर्दिष्टेन चेह विहितं शक्यते विशेषयितुम् । अथेदानीं षष्ठीनिर्दिष्टे-

SGDF
Sri Gargeshwari Digital Foundation

नापि विहितं शक्यते विशेषयितुं शंक्यमार्द्धधातुकग्रहणमकर्तु-
मिति प्रकृतसूत्रे भाष्ये स्थितम् लूभ्यामित्येतत्समानमेव जुगु-
प्सतइत्यार्द्धधातुकग्रहणाभावे ऽप्यदोष एव । सनो ऽनार्द्धधातु-
कत्वफलं गुणाभाव एव तेनेङ्गुणौ नेति फलन्तु भाष्यमते
फलितार्थकथनपरं जुगुप्सतइति प्रत्युदाहरणं च ८ व्यपदेशिव-
द्भावो ऽप्रातिपदिकेनेति पूर्वादिनिस्सपूर्वाच्चेति योगविभागेन
ज्ञापितेयमन्यथैकयोगं पूर्वात्सपूर्वादिनिरित्येव कुर्य्यात् न चात्र
पृथग्योगे इष्टादिभ्य इत्यत्र स पूर्वादित्यस्यानुवृत्तिर्न स्यादेवं
चानिष्टीति न सिध्येदिति वाच्यम् । ज्ञापकपरंयेनविधिरितिसू-
त्रभाष्यप्रामाण्यादनिष्टीत्यस्यासाधुत्वात् एकयोगे ऽपि तावत्
उत्तरत्रानुवृत्तौ बाधकाभावाच्च अत एव एवनान्तादसंख्यादे-
रिति सार्थकमन्यथा ऽत्रापि व्यपदेशिवद्भावेन पञ्चम इत्यादाव-
पि संख्यादित्वात्तद्वैयर्थ्यं स्पष्टमेवेति परिभाषेन्दुशेखरे स्पष्टम् ।
अत्रैष विचारो मन्दप्रयोजनः ९ ॥ पूर्वत्रासिद्धम् । सपादसप्ता-
ध्यायीम् उत्तरत्रास्य पाठात्पूर्वत्र पदेन तस्याग्रहणात्त्रिपाद्या
आसिद्धत्वं प्रति सूत्रे उत्तरत्रासम्बन्धात्फलितस्त्रिपाद्यां पूर्वं प्रति
परमासिद्धमित्यर्थः । एवमर्थेश्चुत्वं धुटि सिद्धम् वाच्यमित्यादि-
वार्तिकानि प्रमाणानि फलं गोधुङ्मानित्यादिसिद्धिः अन्यथा
पूर्वं पूर्वशास्त्रप्रवृत्तौ घत्वजश्त्वानुनासिकेषु सत्सु भष्भावो न
स्यादिति शब्दरत्नोक्तिः । सा विरुद्धेति पदान्ते भष्भावस्य
न्याय्यत्वात् तत्समाधानं जश्त्वापवादत्वे ऽप्यनुनासिकत्वापवा-
दत्वाभावात्तत्र कृते भष्भावो न स्यात् जश्त्वेकृते इत्यत्र जश्त्वा-
प्राप्तावित्यर्थ इति पण्डितोक्तिरसम्बद्धा जश्त्वे कृते इति
मूलाभावे जश्त्वप्राप्ताविति व्याख्याया दूरापास्तत्वात् । वस्तुतस्तु
पौर्वापर्य्याश्रयणाविरोधेन पूर्वपूर्वप्रवृत्त्या चर्त्वभष्भावजश्त्वा-

SGDF
Sri Gargeshwari Digital Foundation

नुनासिकानां प्रवृत्तौ नैवानिष्टं किञ्चित् किन्तु घत्वे कृते झय इति मतोर्मस्य तत्त्वापत्तिरेव शेखरोक्ता सुष्ठु इति चिन्त्यं सुधीभिः । अत्र यद्यपि लोके नाहार्य्यज्ञानस्यैव प्रवर्तकत्वम् इष्टं तथापि शास्त्रप्रामाण्यादाहार्य्यारोपोऽपि शास्त्रप्रवृत्तौ अप्रवृत्तौ च नियामक इतिबोद्धव्यमिति शेखरः । लोके नाहार्य्येत्यादिनियामक इत्यन्तमुक्तम् । तस्यायंभावः । यथा भूतले घटोऽस्तीत्यादौ भूतलाधिकरणकघटकर्तृकसत्वाऽत्यन्ताभावप्रतिबन्धिका एवमेतत्रिपादीस्थं शास्त्रं सिद्धमेव तत्रापि त्रिपादीस्थकर्तृकसम्भवज्ञानं प्रतिवन्धकम् एवं च पूर्वं शास्त्रं प्रति त्रिपादीस्थमसिद्धमित्यनुपपन्नमेव स्यादतो ऽदर्शनरूपे लोपे ऽभावारोपस्य रूपत्वेन मनोरथः इत्यादावदोषोऽभावाभावस्य प्रतियोगिस्वरूपत्वात् न चोत्वदृष्ट्या रोरित्यस्यासिद्धत्वमिति वाच्यम् ॥ दीर्घविधिसामर्थ्यादाश्रयासिद्धत्वात् अत्र समाधानं कर्मणो रोमन्थेत्यादिनिर्देशेन यत्र शास्त्रान्तरदृष्ट्याऽसिद्धत्वम् नास्ति तत्रैवाश्रयासिद्धत्वमत्र तु हशि चेत्यतत्प्रवृत्त्यापि रोरित्यस्योत्वमिति नाश्रयासिद्धत्वमन्यद्विभावयन्तु पण्डिताः ॥ वस्तुतस्तु यौगपद्येन शास्त्रद्वयप्रसङ्गे शास्त्रासिद्धत्वपक्षे रोरीत्यस्याप्रकृत्य ढ्रलोपाभावेन लोपशास्त्रस्यैवाप्रसङ्गः कार्य्यासिद्धत्वे- रलोपे हशि चेत्यतः परत्वाल्लोप इति दीर्घेऽपि हशि चेत्यन्तरङ्गं प्रतिपदद्वयसापेक्षबहिरङ्गदीर्घस्य पूर्वत्रासिद्धमिति रलोपस्यासिद्धत्वादुत्वमेव किञ्च कर्मणो रोमन्थेत्यादिनिर्देशेनासिद्धवचनं किमर्थमादेशलक्षणप्रतिषेधार्थमुत्सर्गलक्षणभावार्थं चेति भाष्येण तत्रत्यकैयटविवरणाभ्यां शास्त्रासिद्धत्वस्यैवाश्रयणाददोष इति दिक् ९ स्त्रीप्रत्यये चानुपसर्जनइति ॥ अनुपसर्ज्जने स्त्रीप्रत्यये तदादिनियमो न उपसर्जने तु भवत्येव करीषन्धेरपत्यं स्त्रीत्येर्थ

SGDF
Sri Gargeshwari Digital Foundation

तस्यापत्यमित्यणि अणिञोरनार्षयोरिति ष्याङित्यणः ष्यङादेशे चापि च रूपम् कारीषगन्ध्यायाःपतिः कारीषगन्धीपतिः परमकारीषगन्धीपतिः ष्यङः सम्प्रसारणं पुत्रपत्योस्तत्पुरुषइति सम्प्रसारणं यथाऽत्र भवति तथा परमकारीषगन्ध्यायाः पतिः परमकारीषन्धीपतिरत्रापि भवति स्त्रीप्रत्ययस्यपतिं प्रत्युपसर्ज्जनत्वेऽपि परमशब्दार्थं प्रत्यनुपसर्जनत्वात् कारीषगन्ध्याशब्दस्यापि ष्यङन्तत्वात्कारीषन्ध्यामतिक्रान्ताऽतिकारीषन्ध्येति विग्रहेऽतिक्रान्तार्थम्प्रति स्त्रीप्रत्ययस्योपसर्जनत्वात्तदादिनियमसत्वादतिकारीषगन्ध्याशब्दस्यापि ष्यङन्तत्वान्न संप्रसारणम्। अत्र पण्डिताः इयं परिभाषा न कर्त्तव्या ष्यङोऽनुपसर्जनस्य सम्प्रसारणमित्यादिसूत्रकरणात्। अत्र समाधानं परमकारीषगन्ध्या यस्य स परमकारीषगन्ध्यः विनापि प्रत्ययं पूर्वोत्तरपदलोपो वक्तव्य इति परमपदस्य लोपे कारीषगन्ध्यस्य पुत्र इति विग्रहे कारीषगन्धीपुत्र इतीष्यते स नस्यात् अतः परिभाषयैव वारणम्॥ यद्यपि संज्ञा सत्तायां विषये पूर्वोत्तरपदलोपे सत्याभामा भीमो भीमसेन इत्यादि तदुदाहरणात्तथापिस्तोः श्चुनेत्यत्र योगः संयोगः सम्पदस्य सत्याभामेत्यादाविव विनापीत्यतो लोपादिति शेखरे विरोधादसंज्ञायामपि लोप इति वदन्ति एतच्च परिभाषावर्णनं तस्याः प्रयोजनान्तरं नास्तीत्यभिमानेनैव वस्तुतस्त्वति खट्वायेत्यत्र याड्वारणम् परमखट्वायै इत्यादौ तद्भावनं परमकारीषगन्ध्याशब्दः प्रत्ययग्रहणपरिभाषया ष्यङन्तो न भवति इति परिभाषाश्रयणमनुपसर्जनत्वात्तदादिनियमेनात्र ष्यङन्तमपि तथापि ध्वनितं भाष्येपूर्वपदलोपो ऽप्यत्र चिन्त्यः। बहुधनोऽल्पधन इत्यादावपि तदापत्तेः॥ यच्चु योगपदे सम्पदलोपोदाहरणं तत्र युजेरेव संयोगार्थकत्वेनादोषात् अत एवा-

SGDF
Sri Gurgeshwari Digital Foundation

व्यवहिते श्चुत्वसिद्धये स्तौ श्चौ श्चुरित्युक्तम्। भाष्यसूत्रकारमते ऽपि स्पष्टप्रतिपत्तये संयोगपदाध्याहार ऐवोचित इति दिक् १० इजादेश्च गुरुमतो ऽनृच्छः। इजादेःकिम् ववौ॥ गुरुमतः किम् उबोष। अनृच्छः किम् आनर्च्छ। न च ऋच्छत्यृतामिति लिटि गुणविधानसामर्थ्यादाम्न भविष्यति किमनेन पर्युदासेनेति वाच्यम्। गुणविधानसामर्थ्येनामाव्यवहितेऽपि तत्प्रवृत्तेरिति शेखरे समाहितम्। तत्राशङ्का सूत्रे ऽनृच्छ इति पदाभावे आनर्च्छेत्यत्राम् प्राप्तः गुणो ऽपि प्राप्तस्तत्र प्रतिपदोक्तत्वादपबादत्वाच्च गुणे कृते इजादित्वाभावादामः प्राप्तिरेव नेति व्यर्थमनृच्छपदमत्र समाधनम् विभावयन्तु सुधिय इति पण्डिताः शेखरपङ्क्तिस्तुइत्थम् न च ऋच्छेर्लिटि गुणविधानसामर्थ्यादेव तत्सार्थक्यादिति सूत्रतात्पर्य्यादिति अनयापङ्क्त्या भाष्यसिद्धान्तो ऽप्यागत इति सूचितम्। तथा हि इयेषेत्यादावाम् व्यावृत्तये उपदेशे गुरुमतो ऽनृच्छइति उक्त्वा एवं तर्हि उच्छेराम्वक्तव्यः। अनृच्छ इति ज्ञापकादनौपदेशिकस्यापि गुरुमत्त्वस्याश्रयणे उञ्छांचकारेत्यादावसिद्धौ इयेषेत्यादावतिप्रसङ्गमाशङ्क्य उभयं न वक्तव्यमुपदेशग्रहणम् न करिष्यते कस्मान्न भवति इयेषेत्यादौ उक्तम् वा किमुक्तं सन्निपातविरोधादित्यनृच्छग्रहणं व्यर्थमेवेति भाष्ये स्थिते पूर्वशेखरे ऽनृच्छइति पर्युदासमाश्रित्यैचो गुरोरनृच्छ इत्येव सिद्धे रादिग्रहणं मतुब्ग्रहणं च स्पष्टार्थमित्युक्तम्। इजादिगुरुमतेनैवानृच्छ इति पर्युदासः सार्थको नान्यथेति तद्भावस्तदपि चिन्त्यमेव संयोगे गुरुमत्त्ववतामेव ग्रहणापत्त्या इङ्गतौ इत्यादीनामसंग्रहापत्तेः॥ इचो गुरोरिति सामर्थ्यान्नायं दोषाऽन्यथाऽनृच्छ इत्येव ब्रूयादिति चेत्तावतापीचो यदि गुरुमत्त्वस्याश्रयणे इङादेरसंग्रहः उञ्छादेरेव संग्रह

SGDF
Sri Gangeshwari Digital Foundation

इति दोषसद्भावात् वस्तुतस्तु गुर्विजादेरित्युक्त्येतरत्कर्तु मशक्य-मथ वा गुर्वादेरित्येवास्तु दयायासश्चेत्यत्रासग्रहणादकारगु-र्वादेश्चेतद्यासेवेति नियमात्सिद्धेः न वा सेरौपदेशिकाकारगु-र्वादित्वेनैतद्विषयकनियमे शाल्वादिप्रभृतिष्वाम्स्यादितिवाच्य-म् । लाघवेन सामान्यनियमाश्रयणादिति दिक् ११ अतो दी-र्घो यञीति सार्वधातुकेकिम् केशवः अङ्गना केशाद्वो ऽन्यतर-स्यामिति वः अत्र केचित् सार्वधातुकग्रहणं मास्तु सुपि चेति सूत्रनियमादेवादोषात् सार्वधातुकभिन्ने यजादौ दीर्घश्चे त्तर्हि-सुप्येवेति केशवशब्दादावप्रवृत्तेः समाधानन्तु राजभ्यामित्या-दावपि दीर्घापत्तिरिति अतोदीर्घस्यसुब्विधित्वाभावेन न लोपः सुप्स्वरेति न लोपासिद्ध्यभावात्सुबूतद्व्याप्यधर्म्माश्रयविधौ च सुविधित्वादिति समाधानान्तरं तु तत्त्वप्रकाशिकायां द्रष्टव्यम्र १२ ज्योतिरायुषः स्तोमः समासेऽङ्गुले सङ्ग इत्यतस्स मास इत्यनुवर्तते आध्याम्रुत्तरस्योत्तरपदावयवस्य ष इत्यर्थः ॥ अत्र मूले समासेकिम् । ज्योतिषः स्तोम इत्युक्तम् । तत्र इण्को-रित्याधिकारात् किन्तु ज्योतिस्तोमोऽस्ति ब्राह्मणानामिति प्रत्युदाहर्त्तुमुचितमिति पण्डिताः । केचित्तु समास इत्यस्य नि-वृत्तावप्यस्य पदविधित्वात्समर्थपरिभाषया समास एवास्य प्रवृत्तिरिति समासग्रहणं चिन्त्यप्रयोजनमित्याहुस्तन्न । पदा-धिकारस्यापदान्तस्य मूर्धन्य इत्यतः प्रागेव निवृत्तेः भाष्ये उक्तत्वात् । वस्तुतस्तु मूलाशय इत्थं योज्यः १३ नुम्विसर्जनी-यशर्व्यवायेऽपीति षत्वस्य सात्पदाद्योरिति निषेधस्यापवादोऽयं तेन नुम्विसर्जनीयेति सम्बध्यते इति वाक्येऽपि प्रवृत्तिः । न च प्रत्येकमिति व्याख्यानान्निस्व इत्यत्रेवात्राप्यप्रवृत्तिरिति वाच्यम् ॥ एवं तर्हि समस्तान्येव भीरुष्ठानाग्निष्टुदग्निष्टोमज्योतिष्टो-

SGDF
Sri Gangeshwari Digital Foundation

मादीत्यन्तं समासेकिम् इत्यनेन तदधिकारीयभीरोः स्थानमित्यादित्रिसूत्री किमर्थेति प्रश्नाशयः। असमासेप्रवृत्तिविरहात्पुष्यार्था सेति तदुत्तरमित्यन्ये १४ रामाद्रामादित्यत्र मूले जश्त्वं वावसान इत्युक्तम् पूर्वं चर्त्वासिद्ध्या जश्त्वमिति मनोरमा अपवादत्वाज्जश्त्वं बाधित्वा चर्त्वं ततो जस्त्वमिति शेखरः जश्त्वाप्राप्तिविषये चर्त्वस्याचारितार्थ्यादपवादत्वसङ्गतेरिति शेखराशयः। अस्योपरि दूषणान्तरं षष्शब्दादौ पूर्वे षस्य ष एव चर्त्वे ततो जश्त्वे ष एव श्रूयेत जक्षित्यादयः षडिति निर्देशेन षस्य टकार एव न तु षकार इति परिहारेऽपि पूर्वापरविरोधः शेखरस्यास्त्येव उपानदित्यत्र घत्वजश्त्वचर्त्वानीति तदुक्तेः॥ किञ्च चतुर्णामित्यत्र णत्वं द्वित्वमिति प्रतीकमुपादाय ननु द्वित्वं णत्वामित्येव युक्तम् पूर्वत्रासिद्धमद्वित्वे इति वचनादिदं वर्णद्वित्वेऽपि प्रवर्तते वाक्कवागिति भाष्योदाहरणात् अन्यथा द्वित्वदृष्ट्या चर्त्वस्यासिद्धत्वाद्गस्यैव द्वित्वे तस्य चर्त्वे पूर्वत्र गश्रवणापत्तेरित्युक्तम् अस्मादपि पूर्वं जश्त्वं पश्चाच्चर्त्वमित्यायातीति पण्डिताः पदान्तविषये पूर्वं॥ जश्त्वमिति न्याय्यमेव वावमाने इत्यस्यापदान्तझलां चर्त्वविधानेन चारितार्थ्यात् अत्र पदाधिकाराभावात् अनुकरणं चानितिपरमिति ज्ञापकादनितिपरस्याप्यनुकरणस्य सत्वादवसाने स्यदाद्यनुकरणेत्यत् तत् इत्यादौ पक्षे चर्त्वस्यापीष्टत्वात् नत्विदमयुक्तं न ह्यनुकरणत्वभङ्गभियाशास्त्रस्य बाधश्चमत्कारतामुपैति पटत् इति इत्यादिषु अव्यक्तानुकरणस्यात् इताविति शास्त्राणामप्रवृत्त्यापत्तिः तेषां वैयर्थ्यापत्तेश्चेत्यलं विस्तरेण १४ प्राचां ष्फस्तद्धितः गार्ग्यशब्दात्ष्फः आयनादेशे यस्येति चेति तद्धितनिमित्त इकारलोपः तद्धितान्तत्वे प्रयोजनं प्रातिपदिकसंज्ञा च ष्फान्तस्य तेन षिद्गौरेति सिद्धश्च ङीषिति तत्र सवर्ण-

SGDF
Sri Gargeshwari Digital Foundation

दीर्घेण षित्त्वसामर्थ्यादप्रातिपदिकत्वेऽपि ङीषा च सिद्धिमाश्रित्य तद्धितग्रहणं प्रत्याख्यातम् गौकक्ष्यशब्दो गर्गादियञन्तस्तस्मात्क्रौड्यादिभ्यश्चेति क्रौड्यादिगौकक्ष्यशब्दात्ष्यङ् ततो यञश्चेति चाप् गौकक्ष्या ततः ष्फप्रत्यये विवक्षिते तद्धितेसंज्ञायां भस्याढे तद्धिते इति पुम्बद्भावे चापो निवृत्तिः ष्फप्रत्यये षित्वान्ङीष् गौकक्ष्यायणीति सिध्यति पुम्वद्भावश्च तद्धितत्वएव ष्फस्य संगच्छते पुम्वद्भावाभावे यजन्तत्वविरहात्ष्फो न स्यादिति कस्य चित्समाधानं न युज्यते तथा हि गौकक्ष्यशब्दपाठस्य क्रौड्यादिषु भाष्ये प्रत्याख्यातत्वात्। गौकक्ष्येति तु षाद्यञश्चेति चापि सिध्यति मास्तु क्रौड्यादित्वाष्यङ् न च गौकक्ष्यायणीतिन सिद्ध्येच्चापः ष्फप्रत्ययस्यापबादत्वादिति वाच्यम्। प्राचां ष्फइत्यत्र सर्वत्रेति सूत्रात्सर्वत्रेत्यपकृष्पाप्राचां सर्वत्र ष्फविधानात् गौकक्ष्येति तूदीचां मते सेत्स्यति एवञ्च गौकक्ष्यापुत्र इत्यादौ ष्यङन्तत्वाभावेनष्यङ्सम्प्रसारणमित्यस्याप्राप्त्या गौकक्ष्यायाः सम्प्रसरिणप्रतिषेधो वक्तव्य इति वार्तिकमनारम्भणीयमित्यपरमनुकूलम्। किञ्च ष्फप्रत्यये विवक्षिते भस्याढे तद्धितइत्यस्य प्रवृत्तिरनुचितैवायनादशोत्तरमेव भसंज्ञायाः प्रवृत्तेः किञ्च ष्यङन्ते यञन्तत्वविरहेण ष्फस्याप्रवृत्तेः किञ्च तद्धितग्रहणमन्यतो ऽपि विधानार्थं तेनासुरेरुपसंख्यानंनापूर्वमिति कैयटो ऽप्येकदेशी तथा हि आसुरेरुपसंख्यानमित्यस्याग्रे भाष्ये छश्चेति वक्तव्यमासुरीयः इत्युक्तं तत्र सिद्धान्तः कैयटः आसुरिणा प्रोक्त इति विशेषे ऽर्थे ऽजश्चेति अणि प्राप्तछ एव क्रीयते लाघवादन्यथा द्विरासुरीयग्रहणं कर्तव्यं स्यादिति एतेनोप संख्यानस्यावशयकत्वे प्राचामिति सूत्रस्थभाष्ये तद्धितग्रहणं प्रत्याख्यानमेवाद्रियेत इति तत्वप्रकाशिकायां द्रष्टव्यम् १५ टिड्ढेत्यत्र वार्त्तिकम्

SGDF
Sri Gargeshwari Digital Foundation

नञस्नञ्ईकक्ख्युंस्तरुणतलुनानामुपसंख्यानमिति तेन ङीपि अन्तानुदात्ताविमौ गौरादिङीषि तु अन्तोदात्तामिति ग्रन्थकाराः तत्र पण्डिताः वार्त्तिके गौरादौ चानयोः पाठो मास्तु बह्वादिष्वेवानयोरस्तु पाठस्तत्र पाठान्ङीष् सिद्धः पक्षे वयस्यचरम इति ङीबिति स्वरद्वयसिद्धिरिति समाधानं विभावयन्तु सुधिय इति। अत्रेदं तत्त्वं तरुणतलुनशब्दौ त्रौरश्च ल इति उरन्प्रत्ययान्तौ यौगिकौ तरति प्रथमं वयस्तरति दुःखमिति वा यदाह दुःखतरणकं औणादिः तदापि ङीष्सिद्धये गौरादिपाठआवश्यको नेह वयस्यचरमइति प्राप्नोति एतच्च वयस्यचरमइति ब्रुवता तरुणतलुनयोरुपसंख्यानं कुर्वता वार्तिककारेण सूचितम्॥ सूत्रकारमतेन प्रथमवयोबाचिन एव ग्रहणात्तरुणतलुनयोरग्रहणमेव सर्वथेति गौरादिपाठस्तयोरिति बोध्यम्। मध्यान्हे तरुणो रविरित्यादौ प्रचण्डो रविरित्याद्यर्थमावश्यकं तरुणशब्दः प्रौढपर्यायो ऽपि अथ तदर्थको यदा तरुणशब्दः प्रयुज्यतेऽथ वा तरुणतात्पर्येण वृद्धेऽपि प्रयुज्यतेऽथवाप्रौढ्यार्थको वा गृह्यते तत्तात्पर्य्येणोपसंख्यानमिति १६ घेर्ङिति अत्राङ्गस्य सुपीति चानुवर्त्तते अत्र पण्डिताः घेर्ङीत्येवास्तु यस्मिन्विधिरिति परिभाषया तदादिविधौ ङादौ सुपीत्यर्थेण सिद्धे ङित्ग्रहणं व्यर्थं प्रायोगिकङादेरसम्भवादावौपदेशिकङादित्वं गृह्यते प्रवाहशब्दात्तृतीयैकवचनस्थाने आङ्याजरेत्याङादेशस्तु ङादेशएवास्तु प्रवाहवेत्यादिसिद्धये मत्यामित्यादौ तु ङेरामादेशे तस्य ङादित्वाभावादाण् नद्या इति न प्रवर्तेत ङितिकरणे तु अनुबन्धकार्य्यत्वादनल्विधाकार्य्यत्वादनल्विधावपि स्थानिवत्वाज्जायते यद्यपि तथाऽपि ङेरामित्यत्र ङेर्ङामित्युक्ते न कश्चिद्दोष इति प्रश्नः। अत्रोत्तरं ङामादेशे कृते लशक्वित्संज्ञा आण्नद्या इत्याद् च प्राप्तौ

SGDF
Sri Gurgeshwari Digital Foundation

तत्राडागमस्याङ्गत्वाद्वार्णपरिभाषयान्तरङ्गाया अपीत्संज्ञाया बाधे ङकारश्रवणापत्तिराडागमस्य नित्यत्वमपि इति केचित्समादधत्ते वस्तुतस्तु इत्ग्रहणं स्पष्टार्थम् आण् नद्या इत्यादौ सेनान्यामित्यादौ ङामादेशश्चरितार्थ इति नद्यावन्ते परत्वान्ङमादेशे सकृद्गतिन्यायादाडागमाप्रवृत्तेर्यणा रूपासिद्धेः न चाडागमाभावे नुट् स्यादिति वाच्यम् निरनुबन्धपरिभाषया आम्ग्रहणेन ङामोऽग्रहणादत एव सानुबन्धो ङामादेशश्चरितार्थः न चैवं रीत्या नुटोऽभावे ऽपि आट्इव याट्स्याटोरप्यप्रवृत्तिः स्यादिति वाच्यम्। लक्ष्यव्यवस्थापकावेतौ न्यायौ पुनः प्रसङ्गेति सकृद्गतेतिवल्लक्ष्यानुरोधाद्याट्स्थाटोर्विषये पुनःप्रसङ्गाद्याट्स्याटावित्यदोषात् कथमन्यथाऽटि कृतेऽपि यदागमन्यायात्पराद्विवद्भावाद्वाऽऽमत्वेन प्राप्तस्य नुटो बारणं भाष्योक्तं सङ्गच्छेत आगमादेशे परत्वात्कृते पुनःप्रसङ्गादाट् तस्मिन्कृते सकृद्गतिन्यायान्नुटोऽभाव इति भाष्यमते यथासिद्धिरिष्टस्य तथाऽत्र पक्षे ङामि कृते सकृद्गत्याऽऽटो भावः पुनःप्रसङ्गाश्रयेण याट्स्याटोः प्रवृत्तिरेव न भेदो रूपासिद्धिः समैव अथ वा भवत्वाट् ङस्येत्संज्ञा तु लशक्वित्यत्रोपदेशे ऽजित्यत उपदेशपदानुवृत्त्या सेत्स्यति प्रत्ययस्योपदेशे आदिभूतं यल्लशकु तस्येत्संज्ञेति व्याख्यानात् एतच्च चुटूइति सूत्रे भाष्ये ध्वनितं तथा हि चञ्चुपचणपोश्चकारप्रतिषेध इति वार्त्तिकप्रत्याख्यानाय भाष्ये उक्तं यकारादीचञ्चुपचणपौ किं यकारो न श्रूयते लुप्तनिर्दिष्टो यकार इति अत्र यकारे लुप्ते ऽपि प्रत्ययादिश्च इतीत्संज्ञाप्राप्त्योपदेशे आदिश्चकारो नास्तीति तात्पर्य्यं फलम् कल्प्यम् सामर्थ्यकल्पनाया अनौचित्यादेवञ्च लशक्वित्येतत् सूत्रे ऽपि साहचर्य्येणोपदेशपदानुवृत्त्याऽदोष इति तत्वप्रकाशिकायां द्रष्टव्यम् १७ अनेकाल् शित्सर्व-

SGDF
Sri Gangeshwari Digital Foundation

स्य। अत्र शेखरः नानेकालशिदिति तु नोक्तम् तन्न युक्तम् अनन्तरत्वादादेः परस्येत्यस्यैव निषेधे हि ङिद्दनेकाल् अलोऽन्त्यस्येत्येवान्त्यस्य सिद्धे ङिच्चेति व्यर्थमेवेत्यत्रानन्तरन्यायो न प्रवर्त्तते अत्र समाधानं कुर्वन्तु सुधिय इति अत्र पण्डिताः यद्यप्येतत्कौस्तुभे ऽप्युक्तम् अन्त्यस्यादेरिति चानुवर्त्यानेकाल्शिदाद्यन्तयोर्नेति ङिदनेकालो ऽन्त्यार्थं ङिच्चेत्यारब्धव्यमिति तथापि युक्तः शेखराशयः। ङिच्चैत्यारम्भात् पदबाधे क्लेशात्पदलाघवाद्यथान्यासमुचितमिति १८ अदर्शनं लोपः। अत्र षष्ठी स्थानइत्यनुवर्तते तेन षष्ठ्यन्तस्य स्थाने यददर्शनं तल्लोपसंज्ञेत्यर्थः। तेन त्रपु इत्यत्र क्विपो ऽप्रसङ्गात्तददर्शनस्य लोपसंज्ञाऽभावाद्ध्रस्वस्य पितीति तुक् न भवतीत्याह प्रसक्तस्येति तदुक्तं शेखरे तस्मात् त्रपु इत्यत्र क्विपो ऽदर्शनस्य सत्वेन न प्रत्ययलक्षणेन तुगापत्तिर्दोष इति न चायं शेखरग्रन्थः स्थानिवत्सूत्रस्थभाष्यविरुद्धस्तथा हि भाष्ये शब्दस्य नित्यत्वाद्बुद्धेरेव स्थानितादेशता चेति पक्षे सेनानीरित्यादौ कर्मण्यण् वृद्धिः क्विब्वृद्धेरिति स्थानिवत्त्वेन वृद्धिः प्राप्नोतीत्यांशङ्क्य षष्ठीनिर्दिष्टस्य स्थाने यत्रादेशस्तत्रैव स्थानिवदिति समाहितं प्रकृते क्विपः प्रातिपदिकेप्रत्ययलक्षणे न तुगापत्तिः प्रत्ययलक्षणसूत्रेणापि स्थानिवद्भावएवानूद्यत इति चेन्न। त्रपुइत्यत्र दोषाभावेनैवात्र भाष्ये ग्रामणीरित्यत्राण्प्रसङ्गे प्राप्ते क्विप्प्रसङ्गे बुद्धेरेव स्थानिवद्भावाद्वृद्धिमाशङ्क्य यो ऽत्राण् प्रसङ्गः क्विपा ऽसौ बाध्यते इत्युक्तम् सत्सूद्विषेति क्विपो ऽविधानादणो ऽत्राप्रसङ्ग इति कैयटः अस्माद्भाष्यात्षष्ठीनिर्दिष्टस्य स्थानिवद्भावो बोधित एव त्रपु इत्यत्र तु अण इव क्विपः प्रसङ्गो नास्तीति तत्र प्रत्ययलक्षणप्रदर्शनमेकदेशिन इति तत्त्वम्। ग्रामे तिष्ठतीत्यत्र ल्यबन्तार्थानि-

SGDF
Sri Gangeshwari Digital Foundation

रूपितार्थाधिकरणत्वाभावत्क्तिबन्तार्थानिरूपितधात्वर्थक्रियायाः प्रकृत्यर्थत्वाभावाच्च प्रकृते षष्ठीस्थाने इत्यस्य भाष्ये ऽनुवर्त्तितत्वाच्च । वस्तुतस्तु स्थानिवत्सूत्रोक्तषष्ठीनिर्दिष्टस्यादेशः स्थानिवदितिभाष्येणैव गतार्थता प्रकृतसूत्रे षष्ठीस्थानइत्यस्यानुवृत्तिप्रदर्शनं भाष्ये स्पष्टार्थमेवेति । यत्तु अदर्शनमिदित्येवास्तु अदर्शनस्येत्संज्ञा तस्य लोप इति न कर्तव्यमुपदेशेऽजित्यादिसूत्रैरदर्शनस्यैव विधानादिति तन्न कृत्रिमाकृत्रिमयोः कृत्रिमस्यैव ग्रहणे भृञामित् तिष्ठतेरित् प्रत्ययः स्यादिसादिष्वित्पदेनादर्शनप्रतीत्यापत्या लक्ष्यासिद्धेः तपरसूत्रस्य कृादित्यादिविषयं स्यात्तक्रकौण्डिन्यन्यायेनेत्यदर्शनबोधिका संज्ञा स्यान्न तु तत्कालबोधिकेति संज्ञयोर्विरोधाच्च समावेशासम्भवः इदित्येकमात्राकालिकेकाररूपस्य भावस्य दर्शनरूपत्वाभावात् तपरसूत्रेणास्यासंज्ञायाः बाधो ऽस्या निर्विषयतापत्योपदेशे ऽजित्यादीनास्वरूपमात्रबोधकतापात्तिः स्यात् इदितो नुमित्यस्य त्वयमर्थः स्यात् इदिकारो ऽदर्शनं यस्य सामर्थ्यात् यस्येकारो नास्ति अनप्रभृतेस्तस्यैव नुम् स्यात् चिति प्रभृतेरिकारवतो नस्यात् अथाऽपि कथंचिदन्तेदितइति व्याख्यानात्स्याद्भृजामिदित्यादिष्वतपरनिर्देशेन निर्वाहे तु अदर्शनमिदिति सुवचमेव १९ द्विस्त्रिश्चतुरिति कृत्वोर्थे । अत्र शेखरः इसुसोरिति उत्तरसूत्ररीत्या सुच इति सूत्रयितुमुचितम् । सुजन्तस्य पदस्येत्यर्थादिति अत्र दूषणं चतुष्करोतीत्यत्रे दुदुपधस्येति नित्यषत्वापात्तिः सुच इत्यस्यासिद्धत्वात् अप्रवृत्तेः । सिद्धान्ते तु चतुर्ग्रहणसामर्थ्यान्नासिद्धत्वमित्यदोष इति अत्र समाधानमिदुदुपधस्येत्यत्रापि सम्बन्धापत्तेः सिद्धान्ते तु चतुर्ग्रहणसामर्थ्यान्नासिद्धत्वमित्यदोष इति अत्र सपाधानमिदुपधस्येत्यत्रापि सम्बन्धापत्तेः भाष्ये तु इदु-

SGDF
Sri Gargeshwari Digital Foundation

दुपधस्येत्यनुवर्त्य क्त्वोर्थइत्येव सुवचमिति स्थितम् तदुपपत्ति-स्तु सुच इत्येव सिद्धे गुरुभूतनिर्देशादत्रासिद्धत्वमिति चतुष्क-रीतीत्यत्रेष्टौ विकल्पः संपन्न इति तत्त्वप्रकाशिकायां द्रष्टव्यम् २० इको गुणवृद्धी सूत्रप्रयोजनम्वातिकमिग्ग्रहणमात्सन्ध्यक्षरव्यञ्ज ननिवृत्त्यर्थमिति अत्रकैयटः अकारस्याकारे रूपे विशषो नास्ती-त्युक्तमिति अत्र केचिद्विशेषं दर्शयन्ति अकारस्याकारे गुणे कृते पेचिथेत्यत्र न शसददवादिगुणानामिति निषेधादेत्वाभ्यासलोपो न स्यात् वस्तुतस्तु विशेषो नास्त्येव थलि च सेटीत्यरम्भसाम-र्थ्यान्न विशेष इति पेचिथेत्यत्रैव ववरिथससरिथेत्यादावपि निषेधानापत्तिः नशसददेतिसूत्रे गुणस्य तु न वैयर्थ्यम् पपर तुः पपरुरित्यादावृच्छत्यृतामिति गुणे कृते एत्वाभ्यासलोपनि-वृत्त्या चारितार्थ्यात् अत्र केचिदित्थं समाधानं कुर्वन्ति केवल-दीर्घस्थानिकगुणविषये नशसेत्यस्यसावकाशत्वेऽपि गुणग्रहण-मपहायतत्स्थानेइग्ग्रहणमेव ऋग्रहणं वा कुर्य्यात् सानान्येन गुणग्रहणसामर्थ्याद्विजातीयस्थानिका विजातीयगुणस्यैव ग्रहणा-दत्र विजातीयस्थानिकाविजातीयगुणस्याभावादिति कैयटग्रन्थे न काप्यनुपपत्तिः अथवा थलि च सेटीतिसूत्रस्थभाष्यरीत्या न शसददेत्या न शसददेत्यत्र गुणग्रहणं गुणवावयपरं गुणावयवो यो ऽकारस्तस्य निषेधस्तच्चनुनविथेत्यत्रैव सन्भवतीत्यदोष इति पण्डिताः। वस्तुतस्तु अकारान्तधातोरेवारस्याकारस्याकारे गुणे कृते न विशेषतेति कैयटाशयः अकारोपधहलन्ते तु अलोऽन्त्य-स्येति हल एव गुणः नाचः इक्परिभाषाया अभावात् अथ पु-कि अन्तः लघ्वी उपधा पुगन्तश्च लघूपधाचानयोः समाहारः पुगन्तलघूपधमिति समासमाश्रित्य व्यधिकरणान्वयादङ्गावय-वलघूपधाया गुण इति व्याख्यानमालम्ब्य पेचिथेत्यादौ विशे-

SGDF
Sri Gangeshwar Digital Foundation

षोक्तिसम्भवो ऽपि न युक्तः वार्तिकप्रयोजनम् प्रत्याख्यानएवास्य प्रकारस्य भाष्ये उक्तत्त्वात् किं च अयं प्रकारो न वार्त्तिकसम्मतो ऽन्यथाकारसंध्यक्षरेत्याद्येव ब्रूयादात्सन्ध्यक्षरेति नब्रूयात् पुगन्तन्तस्याङ्गस्य गुणो लघूपधस्याङ्गस्य गुण इति सामानाधिकरण्येनान्वये ऽलो ऽन्त्यपरिभाषोपस्थितिपक्षएव वार्त्तिके आदित्युक्तिस्सङ्गच्छते पुगन्तलघूपधस्येति सूत्रं तु उपधावतो ऽङ्गस्य चेत्तर्हि लघूपधस्येति नियमार्थं स्यात्तेनैहितोहितेत्यादौ गुणो गोपयतीत्यादौ नियमबाधो ऽनुगुण एवेति तदपि न । व्यपदेशिवद्भावेन तत्त्वात् २१ क्ङिति प्रतिषेधे तन्निमित्तग्रहणं कर्त्तव्य किम्प्रयोजनं उपधारोरवीत्यर्थं न वक्तव्यं ज्ञापकात् प्रतिषेधो भविष्यति यदयमिकोज्झल् हलन्ताच्चेति सनः कित्वं शास्ति तज्ज्ञापयत्याचार्य्यो भवत्युपधानुपधा वा तस्यापि निषेध इति ग्रन्थः । अत्र केचित् हलन्ताच्चेति सूत्रस्य न वैयर्थ्यं हलस्सनि सन्यङोरिति द्वित्वे ऽत्र लोपोऽभ्यासस्येत्यभ्यासलोपे दम्भ इच्चेति हलन्ताच्चेति सनः कित्वे धिप्सतीत्यत्रानिदितामिति नलोपार्थत्वात् कित्वस्य दम्भ इच्चेत्येव सिद्धेर्हलन्ताच्चेति सामान्यस्यारम्भात् समाधानन्तु सृजिदृशोर्झल्यमकिति सनीको झल्दंभेरिति लघुनोपायेन सिद्धे हलन्ताच्चेति ज्ञापकमेवेति पण्डिताः । वस्तुतस्तु दम्भेरित्युक्ते सनि मीसाघुरभलभशकपतपदामच इसिति मीमादीनामित्यादेशे मित्सतिदित्सतीत्यादौ गुणाभावार्थं हलन्ताचचेति सनः कित्वार्थमावश्यकं तथा सनीवन्तर्द्धं तीडागमाभावे दुध्वूर्षतीत्यादिसूत्रारम्भे एव सिध्यति ज्ञापकपरभाष्यस्य त्वयमाशयः प्रतिलक्ष्यं लक्षणभेदः यद्यपि नलोपामागमाभावयोश्चरितार्थो विधिस्तथाप्युपधागुणनिषेधार्थो हलन्ताच्चेत्यचरितार्थ

SGDF
Sri Gurgeshwari Digital Foundation

इति ज्ञापकत्वं तस्येति २२ नलोपः प्रातिपदिकान्तस्य ॥ अन्तग्रहणमत्र ज्ञापकम् पदस्येत्यधिकारः तत्कचित्स्थानषष्ठी क चिदवयवषष्ठी तेन मादुपधायाश्च मतोर्वोऽइत्यत्रावग्रचषष्ठीत्वे पदावयवमतोर्मस्य व इत्यर्थे वृक्षवन्तावित्यादौ वत्वसिद्धिरन्यथा वृक्षवान्नित्यत्रैव स्यान्न तु वृक्षवन्तावित्यत्रेति शेखरे स्थितम् । वस्तुतस्तु व्याख्यानादेतल्लब्धमन्तग्रहणं स्पष्टार्थमिति पदस्येत्यत्र भाष्ये ध्वनितं तत्र हि नलोपो प्रत्याख्यायतेस्थाने षष्ठी अन्तग्रहणाद्वा नलोपे इत्युक्तम् । लाघवाद्व्याख्यानेनैव षष्ठ्यर्थनिर्णये षष्ठी स्थाने इति योगो ऽन्तग्रहणं च न कार्य्यमिति भाष्याशयः १३ नस्माच्छसो नः पुंसि । ननु शसो नुम् इत्येव सूत्रमस्तु अकःसवर्ण इत्यतोऽकीत्यनुवर्त्याकः परस्य शसो नुम्स्यादित्यर्थः । परत्त्वान्नुमि पश्चात्प्रथमयोरिति पूर्वसवर्णदीर्घे संयोगान्तलोपे सिद्धं रामानित्यादि लिह इत्यादावकः परो न शस् एतान् गाः पश्येत्यत्रापि औतो ऽम्शसोरित्येकादेशआकारे कृते शस्परत्वाभाव इति दोषाभाव इति चेन्न । विश्वष इत्यादावातो धातोरित्यालोपे पूर्वस्मादपि विधावचः परस्मिन्निति स्थानिवद्भावे ऽकः परः शस इति नुमापत्तेः । पञ्चमीसमासप्रत्याख्यानपक्षे तु न दोषः अष्टावित्यत्रौशादेशे आत्वे कृते नुम्स्यादिति वाच्यम् । नकारस्यात्वपरनिमित्तं बहिरङ्गमन्तरङ्गे नुमि कर्त्तव्ये तस्यासिद्धत्वादकः परत्वाभावात् अथ वा औशादेशः क्रियते प्रियतिस्र इत्यादौ त्वचि रेण बाधः अत्र समाधानं कुर्वन्तु सुधिय इति पण्डिताः अत्रेदं समाधानं रामानित्यत्र पूर्वसवर्णदीर्घे नित्यत्वात्कृते पश्चात्सकारस्य नुमापत्तिः मित्वसामर्थ्यात्पूर्वं नुम् चेत्कार्य्यकालपक्षे ऽन्तरङ्गे ऽट्कुप्वाङिति णत्वे कर्त्तव्ये संयोगान्तलोपस्यासि-

SGDF
Sri Gargeshwari Digital Foundation

द्धत्वापत्तिः अत्र पक्षे ऽसिद्धत्वाश्रयणे तस्मादित्येव लिङ्गम्। अथ मित्वसामर्थ्यं न्नुटि कर्त्तव्ये नुम्करणसामर्थ्यादित्यर्थो नकारादेशे कर्तव्ये तत्सामर्थ्यादिति वाच्यम्। स चायुक्तः पुंसि गा इत्यत्र नुमो नकारादेशस्य चारितार्थ्यात् शसः शकारस्योरण् रपरसूत्रस्थभाष्यरीत्या शसःपरत्वाच्छस इत्यस्यावयवषष्ठीप्राप्तिर्बोध्या किञ्च मित्वसामर्थ्यादकः शसो ऽचि परे नुम्यादित्यर्थे ऽक एव नुमापत्तौ रूपासिद्धिः तस्मादिति कृते तु न दोषः शसो ऽची ऽसम्भवादचीति न सम्बध्यते तस्वादित्युत्तरस्येत्यस्य प्रवृत्त्या ऽचो नुमित्यर्थे दोष इति चेत्तर्हि रामानित्यादौ णत्वदोषस्य वारणे निर्देशाश्रयणे प्रतिपत्तिक्लेश इति सूत्रकाराशयः। शसो नः पुंसीत्यपि न युक्तम्। अकः शसवयवेऽचि पूर्वपरयोरचि नत्वादेशापत्तेः एकः पूर्वपरयोरित्यधिकारे पञ्चमी सप्तमी च नैकःस्यानित्यत्वबोधिकेति सिद्धान्तात् अचीति निवृत्तौ तु तव प्रमाणन्नास्ति भाष्ये तस्मात्किं एतान् गा इति न्यासान्तरे दोषान्तरोपलक्षणमिति मम दोषो न। यत्तु औशादेशइत्युक्तम् तन्न औ इत्युक्ते सर्वादेशसिद्धे शित्वं व्यर्थम् अथ औशादेशस्तर्हि संहितायामष्टाभ्य औशित्युक्ते गौरवमसंहितायामप्यष्टाभ्य औइति गौरवम् एव औशि कर्त्तव्ये जश्शसोरनुमीयमानं यद्यपि बहिरङ्गं तथापि नुमागमएव बहिरङ्गः अर्थस्य पुंस्त्यस्याधिक्येनापेक्ष्यत्वात् अर्थकृतबहिरङ्गत्वं नास्तीति तत्वप्रकाशिकायां दूषितमेव किञ्च नुमि कृते ज्ञानगौरवमुकारमकारयोरित्संज्ञा कर्त्तव्या मिदचइत्रस्योपस्थित्याऽचः परत्वं बोधनीयं संयोगान्तलोपे पद संयोगसंज्ञाअपेक्षते इति पाणिनेरनियोक्ता न दृश्यतइति युज्यताम्। यदि तस्मादित्यस्य प्रत्याख्यानेऽत्याग्रहस्तर्हि शसो नः पुंसि इत्यत्राको दीर्घ

SGDF
Sri Gangeshwari Digital Foundation

इति पूर्वसवर्ण इति चानुवर्त्य पञ्चम्या विपरिणाम्याकः पूर्वसवर्णदीर्घात्परस्येति व्याख्यायतां किमनेन तस्मादित्यननेति तत्वप्रकाशिकायां स्पष्टम् २३ हल्ङ्याब्भ्यो दीर्घात्सुतिस्येति अत्र-मनोरमायां हल्ङ्यापस्सोरित्येव सूत्रयितुमुचितम् तत्र शब्दरत्ने सुइदं तिस्योरुपलक्षणमन्यथाविभाराज्यमिति न सिध्येत् । अविभरसूइति स्थितेरुत्वासिद्ध्या संयोगान्तलोपे रोरीति लोपे संयोगान्तलोपस्य पूर्वत्रासिद्धत्वाद्दलोप इति दीर्घो न स्यादिति अयं ग्रन्थः शेखरविरुद्धस्तत्रहि अजर्घाइति भाष्यप्रयोगात्पूर्वत्रासिद्धमित्यत्र पूर्वपदेन लोपसूत्रस्याग्रहणबोधनादित्युक्तम् अत्रेत्थं विरोधपरिहारः भाष्यप्रयोगेण साधुत्वस्यासति पक्षे स्वीकारादिति प्रकृते तु तिस्योर्ग्रहणयत्ने स्थिते तत एव साधुत्वं न भाष्यप्रयोगेण साधुत्वस्यास्य सतिपक्षे स्वीकारात् नासूया कर्तव्या यत्रानुगम इति पङ्क्तिर्विंशतीति सूत्रस्थभाष्यादिति परिगणिताः । वस्तुतस्तु शेखरोक्तः सम्यगेव पितृराज्यमित्यत्रसूत्रकारसिद्धान्तेऽपि संयोगान्तलोपस्यासिद्धत्वाद्दीर्घो न प्राप्नोतीति रोरीति लोपस्याश्रयासिद्धत्वे ऽपि संयोगान्तलोपस्यासिद्धत्वेनोक्तभाष्यप्रयोगेणैव यद्वा नमुन इत्यत्र न ने इत्येव कर्तव्ये मुग्रहणं योगविभागार्थं नेति मुनेति क्वचिदसिद्धत्वन्नेति व्याख्याय प्रयोगाणां निश्चित्य नातिप्रसङ्गः आश्रययोगविभागार्थं नेति मुनेति नदासिध्यर्थत्वात् अत एव प्रत्ययः पर इति रेफस्य लोपः विसर्गः अजर्घा इति भाष्यस्याश्रयात्सिद्धत्वे ऽप्युपपत्तिरस्ति अथ वा कल्प्यमप्यत्रैव तात्पर्य्यं तस्य दोषः संयोगादिइत्यादिवार्तिकानि योगविभागसिद्धानीति तत्त्वम् २४ वदव्रजहलन्तस्याचः हलन्तोऽच इत्येव सिद्धे वदव्रज्योर्ग्रहणम् अतोहलादेरिति वैकल्पिकदीर्घबाधनार्थं ननु

SGDF
Sri Gargeshwari Digital Foundation

वदव्रज्योरच इत्येवास्तु अजग्रहणसामर्थ्याद्धलन्तस्याच इत्यर्थो भविष्यति बदिव्रज्योरवयवस्याच इति नार्थः अतोल्रान्तस्येत्यतो ऽत इत्यनुवृत्त्यैव सिद्धे तस्य वैयर्थ्यात् अजन्तार्थत्वन्तु नास्ति सिचिवृद्धिःपरस्मैपदेष्वित्येव सिद्धेः अनिगन्तार्थमिदमित्यपि न अचिकीर्षदित्यत्र ण्यल्लोपाविति वचनादतो लोपविधानात् अपासीदित्यत्र वृद्धौ नास्ति विशेषः अजन्तानामित्यनेन सिद्ध्यसम्भवात् तदेतदाहुर्भाष्यकाराः एवन्तर्हि इदमेव हल्ग्रहणमनुसृतं हलग्रहणमनन्यार्थम् अज्ग्रहणमनिगर्थमिति अभाङ्क्षीदराङ्क्षीदित्यादिसिध्याऽच आन्तर्याश्रयणे ऽपि विध्यर्थमित्यर्थः अन्यथाचकासीदित्यादावप्यतिप्रसङ्गः स्यात् तदुक्तंभाष्ये सिद्धान्ते व्यवाये तु न भवति यदि सिचानन्तर्य्यं विशेष्यतइति अथानिगर्थमिति भाष्यस्यायमर्थः अग्ग्रहणाभावइक्परिभाषोपस्थाने अभैत्सीदित्यादावेव स्यान्न तु अभाङ्क्षीदित्यादाविति अन्तग्रहणन्तु स्पष्टार्थमन्यथा हलो ऽच इत्युच्यमाने अजन्ताङ्गस्य हलः स्थाने वृद्धिः स्यादित्ययमप्यर्थ आशङ्क्यतेति कैयटे स्पष्टार्थम् । अत्रैष विचारो ऽनुचितशेखरे स्पष्टत्वात् २५ न पदान्ताट्टोरनाम् विशेष्यविशेषणभावादेवान्तपदे लाभे स्पष्टार्थन्तादिति शेखरः पदान्ताद्वेति सूत्रेशेखरे अन्तग्रहणं पदान्तकार्य्यार्थं अन्यथा पदविधित्वापत्त्या समर्थपरिभाषोपस्थितेरसमर्थे तिष्ठति कुमारीच्छत्रं हरदेवदत्त इत्यादौ न स्यादित्युक्तम् तस्यायं भावः नपदान्तादित्यत्र तु न । समर्थपरिभाषोपस्थितेः षण्णामित्यत्र तदुपस्थित्यैव नपदान्तादित्यस्यानुपस्थित्यानामित्यस्य वैयर्थ्यापत्तेः समर्थपरिभाषां प्रतित्रिपादिस्थएव नपदान्तादित्यस्यासिद्धत्वान्न तस्या अत्रोपस्थितिरिति न पूर्वापरविरोधश्शेखरस्येतिपण्डिताः नपदान्तादि-

SGDF
Sri Gargeshwari Digital Foundation

त्यत्र येनविधिरित्यस्यानित्यत्वबोधनार्थमन्तग्रहणम् तेन समासप्रत्ययविधौ प्रतिषेध इत्यादिवार्तिकसूत्रकारेणापि बोधनमिति नापूर्वम् किञ्च निङ्ङ तिङ इत्यत्रातिङ् ग्रहणं पचतिभवति इत्यादौ माभूदिति कृतम् । तत्र तु समर्थइत्येव सिद्धं तत्रैकार्थीभावएव सामर्थ्यमित्यातिङिति ज्ञापकात्पदकार्य्ये ऽपि क्वचित्समर्थपरिभाषानुपस्थित्यैव तुकि सिद्धे पदान्ताद्वेत्यन्तग्रहणमपि स्पष्टार्थम् । किञ्च विशेष्यविशेषणभावे कामचारस्यापि बोधनार्थमन्तग्रहण तेनोतश्च प्रत्ययादसंयोगपूर्वात् उदोष्ठ्यपूर्वस्येत्यत्रोकारयोः संयोगपूर्वः ऋकारो य ओष्ठ्यपूर्व इत्यादिव्याख्यातं भाष्ये सङ्गच्छते अन्यथोकारान्तस्यासंयोगपूर्वत्वग्रहणे ऋकारान्तस्यौष्ठ्यपूर्वत्वग्रहणे वादाश्नुहि इत्यत्र हेर्लुक् स्यादुकारान्तप्रत्ययस्यासंयोगपूर्वत्वाकारो ऽसंयोगपूर्व इति व्याख्याते न दोषः एवं सङ्कीर्ण इत्यत्र धातुर्य ऋदनन्तः स ओष्ठ्यपूर्व इत्यर्थे अत्रैव स्यादिति येनेत्यत्र भाष्ये स्पष्टम् २६ ङसि ङसोश्च अत्र ङिदसीत्येवसिद्धे ङस्ग्रहणं स्पष्टार्थमिति पण्डिताः ङिदसइत्युक्तेः प्रत्ययग्रहणानापत्त्या पदान्तादित्यस्य सम्बन्धे हरेरित्यादौ न स्यात् नियमात्पदान्तादेङो ऽति पूर्वरूपं चेन्ङिदसो ऽकारस्यैवेति पुंसोऽसुङिति असुङित्येकदेशस्यासो ऽनुकरणादिच्छाक्यचि अस्यतीति भवति तस्य देवदत्तो ऽस्यतीत्यादावेव प्रवृत्तिः स्यात्प्रकृतिवदनुकरणमित्यतिदेशेन ङिदसः सम्भवात् अजहत्स्वार्थपक्षे प्रक्रियादशायांकल्पितेनेतास्यासो ऽर्थवत्वाच्च अत एव नमस्कृत्येत्यत्रनमः पदस्यार्थवत्वं नोपपदविभक्तिरित्यनेन द्वितीयावारणं न त्वर्थवत्परिभाषया नमस्योऽनर्थकत्वे गतिसंज्ञा विरहान्नमस्पुरसोरिति सत्वस्यैवानापत्तिः । अनिनस्मिन् ग्रहणेऽनर्थकस्यापि ग्रहणाच्च प्रत्ययाप्रत्यययोरिति प्रत्ययङिदसो-

SGDF
Sri Gangeshwari Digital Foundation

ग्रहणं तु न सा परिभाषैव नास्ति कथमन्यथाचार्य्यो ङसो ग्रहणं कुर्य्यात ङसेश्चेत्यपि न युक्तम् ङश्चसश्चेतिद्वन्द्वे प्रत्येकादेशापत्तेः ङान्त सांतपदसम्बन्ध्यति परस्येति नार्थः । नन्वेवन्तर्हि एङः पदान्तात् ङिदंश इति ङसोश्चातीति वा वक्तव्ये पृथक्सूत्रारम्भसामर्थ्यादेवास्य पदान्तविषयत्वादपदान्त एङ् तु ङसोः परत एव सम्भवतीति न दोष इति चेत्सत्यम् । ङसिङसोर्ग्रहणे तु सामर्थ्यकल्पनाश्रयणीयस्यात्प्रत्ययत्वस्य निश्चयात् अत एव ऋत उदित्यस्य व्याख्यानमृदन्तादङ्गादिति सङ्गच्छते ङसिङसोः प्रत्ययाभ्यामङ्गाक्षेपादन्यथा कर्तुः अस्यतीत्यत्रोकार एकादेशपरभाष्यं न सङ्गच्छते ङसिङस्प्रत्यया भ्यामङ्गाक्षेपे प्राप्नोतीति पदादतस्तथाभूतात् व्याख्यानाच्च ङिदसस्सम्भवात् पदान्तग्रहणस्योत्तरार्थत्वेऽपि ङिदसग्रहणान्मध्येऽसम्बन्धो ज्ञायते सख्युर्यः पत्युर्नः जानिकर्त्तुरित्यादिनिर्देशैः प्रत्ययाप्रत्ययोरिति परिभाषाश्रयणेन वा ङिग्रहणे तु प्रतिपत्तिक्लेशा एवेति दिक् २७ समः समि अत्र सूत्रे शेखरे समो मिङिति इगिति वा न कृतं परिभाषाज्ञानगौरवापत्तेरित्युक्तम् तत्र साकच्कार्थत्वात् सम्यादेशस्यान्यथा समकअच इति स्थिते मिङादेशे ङिच्चेत्यस्य प्राप्तेः मिङादशस्य ङित्त्वादन्त्यस्यः स्यात् समाधानन्तु बहिरङ्गकुत्सादिनिमित्तकत्वेनाकचो बहिरङ्गत्वादादेशोत्तरमेवाकजितिअथैतत्सूत्रभाष्यप्रामाण्येनात्राकचोऽनभिधानमेवेति पण्डिताः । वस्तुतस्तु समः समीति सूत्रे ऽकचोऽनभिधानकल्पनं भाष्यप्रामाण्येन नोपलभ्यामहे किन्तु इदमोऽन्वादेशे ऽनुदात्त इति सूत्रे भाष्ये विचित्रास्तद्धितवृत्तय इत्यकच् न ज्ञायत इत्युक्तम् । तद्भाष्यप्रामाण्येनात्राकचोऽभावे मिङित्युक्तेरूपाविशेषोक्तिः शेखरस्य युक्तैव किञ्च सम्यगर्थसशब्दे कुत्सासम्भवोऽपि नास्ति सूत्रका-

SGDF
Sri Gangeshwari Digital Foundation

रेण तु समिग्रहणे विष्वग्देवयोरित्यनुवृत्तिर्माभूदिति कृतम्। यदा तु टेरित्यनुवर्त्यसम इत्युच्यते तदा न किञ्चिद्दुष्टमिति तत्वप्रकाशिकायां स्पष्टम् २८ सार्वधातुकार्द्धधातुकयोः ननु पिदार्द्धधातुकयोरित्येव कर्त्तव्य मार्द्धधातुकसाहचर्य्याद्धातोरित्युच्चार्य्य विहितस्य पितोर्ग्रहणात्सुलु इत्यादौ न दोषः सार्वधातुकमपिदिति सूत्रं मास्तु समाधानं साहचर्य्यमनित्यज्ञापनार्थत्वं सूत्रस्येति कृत्वोर्थग्रहणं सूत्र इति न्यासेन शेखरे खण्डितमेव फलन्तु सिजभ्यस्तविदिभ्यश्चेत्यत्र सिच्साहचर्य्यमनादृत्याभ्यस्तात्परस्य ङित्सम्बान्धिनो लङ्स्थानिकस्यापि झेर्ज्जुस्मिद्धोऽददु अबोभुवुरिति पण्डिताः। वस्तुतस्तु सार्वधातुकमपिदिति न सादीनां ङित्वार्थं तेनहतो हथ इत्यादावनुनासिकलोपः ग्रहिज्यादिषु सम्प्रसारणादि सेत्स्यति। न च तिङः पित्संज्ञाविज्ञानादपि तिङ्दुर्लभ इति वाच्यम्। तिङ्संज्ञाविधावौपदेशिकपित्वस्य सामर्थ्येनाश्रयणात्सार्वधातुकप्रदेशे तु पिद्ग्रहणमेवास्तु। किञ्च अपिद्ग्रहणमसंयोगाल्लिट्किदित्युत्तरार्थमपि वाच्यम्। पिदार्द्धधातुकयोरिति तु पिति ङितीति निषेधादौपदेशिकपित्स्वेव प्रवर्त्तते न दोषः कैश्चिदिति चेत् प्रदेशेषु पित्पदेन कृत्रिमस्यैव ग्रहणेनाभ्यस्तस्याचि पिति इति निर्देशे ऽपि इत्संज्ञको यः पिदौपदेशिक इत्यर्थस्यावश्यकत्वेऽपि शास्त्रे उभयगतितिज्ञाना त्तस्यानुदातेङिदुदुपदेशाल्लसार्वधातुकमिति पिदित्युच्यमाने एव श्नुचोः पिति रुदादिभ्यः पिति तु रुस्तुसम् समः पिति यङ् पिति अकृत् पितो दीर्घ इत्यादौ संदेहापत्तेरेव स्यात् कृत्रिमपितो ग्रहणे सत्यपि चत् ङीत्वस्यैवाभावे सुप्तिङन्तस्येति पदत्वानापत्तिस्तथा च रुदिहीत्यादौ तिङ्ङतिङ इति निघांतानापत्तिः उभयोः संज्ञासंज्ञयोर्ग्रहणं पूर्वएवेत्युक्तम्। अथ पित्संज्ञा न क्रि-

SGDF
Sri Gargeshwari Digital Foundation

यते सार्वधातुकप्रदेशेषु संज्ञिनिर्देशोऽस्तु तिङ् शिदितिसार्वधा-
तुकसंज्ञायान्तु तिङशशब्दादार्द्धधातुकयोरित्यादिआर्द्धधातुकति-
ङ्शिदिति वक्तव्यम् लिट् चेति वचनाल्लिङादेशस्तिङामार्द्धधातु-
कत्त्वं यत्र शितो ऽसम्भव स्तत्र तिङ्ग्रहणमेव सार्वधातुकस्थले
कार्यं सार्वधातुकमपिदितिङ्शिदपिदितिवक्तव्यम् तिङ शितिय-
गित्यत्र धातोरित्युच्चार्यविहिततिङ्शितियग्विधानाल्लिहो दुह
इत्यादौ कर्म्मे शासि न दोषः शिदार्द्धधातुकयोरित्यत्रार्द्धधातुक-
साह चर्याद्व्रीहीनित्यादौ न गुणः अपितः शितो ऽङित्वे च
घेर्ङितीति गुणो दुर्वार इति वाच्यम् ॥ एवन्तर्हि धातोस्तिङः
शिदपिदिति वक्तव्यम् तिहितविशेषणत्वाददोष इति केचिद्वद-
न्ति २९ इदुदुपधस्य चाप्रत्ययस्य अत्र सूले एकादेशशास्त्रनिमि-
त्तविसर्गस्थाने ऽनेन सूत्रेण न षः कस्कादिषु भ्रातुः पुत्रस्य पा-
ठादिति अत्र पूर्वपक्षः षत्वतुकोरसिद्ध इति षत्वे कर्त्तव्ये एकादे-
शस्यासिद्धत्वादिदुदुपधस्येत्यस्याप्रवृत्तेः कस्कादिषु पाठसामर्थ्या-
त्षत्वमिति मातुः कृपेत्यादौ शङ्कैव नास्तीति तन्न । पदान्तपदा-
द्योरेकादेशस्यैवासिद्धत्वमिति भाष्यसिद्धान्तात् तेन ज्ञापकत्वं स-
म्यगेव तेन परिवीषु परिजीषु इत्यादौ षत्वमिति ज्याव्येञ्भ्यां
क्विपि ग्रहिज्येति सम्प्रसारणे पूर्वरूपे हल इति दीर्घे आदेशप्रत्य-
ययोरिति सुपः सस्य षत्वे कर्त्तव्ये पदान्तपदाद्योरेकादेशाभा-
वात् पूर्वरूपस्य नासिद्धत्वमन्यथा ऽकारेण व्यवधानादिणः पर-
त्वाभावात्सस्य षत्वं न स्यात् यथा वृक्षेच्छत्रमित्यत्रापि सिद्ध
एकादेश इति च्छे चेति तुक् न । वस्तुतस्तु इग्यणः सम्प्रसारण-
मित्यत्र साचः सम्प्रसारणमित्येव सूत्रमस्तु सम्प्रसारणाच्चेति मा-
स्तु वृक्षेच्छत्रमजयेच्छत्रमित्यत्र तुङ्निवृत्त्यर्थषत्वे तुकि पदान्तप-
दाद्योरेकादेशो ऽसिद्ध इति नियमः स्वीकार्यः एवञ्च भ्रातुःपुत्र

SGDF
Sri Gargeshwari Digital Foundation

शब्दः कस्कादिषु विध्यर्थ एव न ज्ञापक इति समाधानं विभावयन्तु सुधिय इति पण्डिताः । वस्तुतस्तु वृक्षेच्छत्रमित्यादावसिद्धत्वे पदान्ताद्वेति नियमं विना न सिध्येदतो नियमोऽयमावश्यक एतन्नियमाश्रयणात्सम्प्रसारणङीषू सु सिद्ध एकादशइतिवक्तव्यमिति वार्तिकं कर्त्तव्यं भवति शकहूषु परिवीषु वृक्षेच्छत्रम् अजपेच्छत्रम इति वार्तिकोदाहरणानि नियमे एव सिध्यन्ति अत्र नियमे शङ्कितं भाष्ये यदि पदान्तपदाद्योरेकादेशो ऽसिद्धस्तर्हि ओषधौषूधीत्यत्रासिद्धत्वाभावे षत्वं प्राप्नोति शसि पूर्वसवर्णदीर्घे सस्य रुत्वं विसर्गः कः कुत इति कृधिकृतेष्वनिदितेरिति सत्वे तत्र समाहितं भाष्यकारेणैव कस्कादिषु भ्रातुः पुत्रस्य पाठादेशात्परस्य न षत्वमिति ज्ञापकस्य सजातीयापेक्षया कुष्वोः परत एव न षत्वं तेनशकहूषु परिवीष्वित्यादावदोषः षत्वतुकोरसिद्ध इत्यत्र पूर्वपदान्तपरपदाद्योरेकादेशो ऽसिद्ध इति व्याख्यातं तैत्रव भाष्ये तेन पदान्तपदाद्योरिति नियमे सिद्धे सिद्धं वृत्रहच्छत्रमित्यादिपदशब्देन पदयोग्यो ऽपि गृह्यते अधीत्यप्रेत्येति भाष्योदाहरणात् परिविपूर्वस्येणः क्विबन्तस्य तुगभावः परिवीयेति ल्यबन्ते च न तुक् अनभिधानात् तदुक्तं प्रत्ययलक्षणमित्यत्र भाष्ये वक्ष्यति अत्र परिहारं इहापि परिवि-
प्रत्ययलक्षणमित्यत्र भाष्ये वक्ष्यति अत्र परिहारं इहापि परिविरिति शास्त्रपरविप्रतिषेधेन परत्वाद्दीर्घत्वं भविष्यतीति आशयमाह कैयटः सति प्रत्यये यत्कार्य्यं भवति तल्लुप्ते ऽपि भवतीति सूत्रार्थः परिवीयेत्यादौ च सति प्रत्यये दीर्घो दृष्टो ऽन तुगिति परिवीरित्यत्रापि दीर्घ एव भवतीति एतेनाधीत्य प्रेत्येत्यत्र तु दीर्घौ दृष्टौ तेनात्र तुक्यसिद्ध इति युक्तैव अत एव औषधीत्यत्राद्धित्त्वान्न ष इति भाष्ययोरविरोध इति केचित्

SGDF
Sri Gargeshwari Digital Foundation

३० आडजादीनाम् न चाजादीनामपिंलङ्लुङ लृङ् क्ष्वित्यडेवास्तु किमनेन सूत्रेण आटश्चेति अटश्चेत्येवास्तु अश्वपो हसन्नित्यत्राङ्गार्ग्यगालवयोरिति स्वपो ऽडागमे वृद्धिस्तु न अटश्चेत्यत्रोपसर्गादृतिधाताविंत्यतो धाताविंत्यपकृष्य तेन धात्ववयवे ऽच्यव वृद्धिरिति न दोषः आणूनद्या इत्यत्र तु अडिति वक्तुमशक्यः बहुश्रेयस्यै पत्यै इत्यादौ वृद्धिबाधकमतो गुण इति पररूपं माभूदिति अड्विधानन्तु बहुश्रेयस्यामित्यादौ नुडबाधनेन चरितार्थमटश्चेति धात्ववयवे ऽच्येव प्रवर्तते आटि सति तु वृद्धिरेचीति वृद्धिरित्याटश्चेति सूत्रस्थशेखरग्रन्थः अदधातोशेखरे तु अटश्चेत्येवास्तु आतीदैधतेत्यादौ तु न दोषः अतो गुणे नाट इति न्यासेन सिद्धत्वात् । एवञ्च बहुश्रेयस्यै इत्यादावटश्चेति वृद्धिं विधाय पररूपबाधकमुभयथा बहुश्रेयस्यै इत्यादौ पररूपं स्यादेव आणूनद्या इत्युक्ते स्याड्याटोर्दीर्घान्तत्वान्नास्ति पररूपशङ्का तथापि पररूपं परत्वात्स्याद्बहुश्रेयस्यै इत्यादौ तदर्थमाणूनद्या इतिवक्तव्यमटश्चेति चकारेण पुनर्वृद्धिविधानं बाधकबाधनार्थं तेनार्थेनैवाटः पररूपमात्रं न इति न्यासे ऽपि तदेव ओमाङोरुसीति न वक्तव्यमिति भाष्योक्तेरुभयथा उस्योमाङ्क्ष्वाट इति नारम्भणीयमिति पण्डिताः । माङ् योगे इति सूत्रेआडजादीनामिति प्रत्याख्यानपरभाष्यं तु ।

अजादीनामटा सिद्धे वृद्ध्यर्थमिति चेदटः ।

अश्वपो हसती त्यत्र धातौ वृद्धिमटः स्मरेत् ।

कथमिति चेद्योगविभागःकरिष्यते अटः अचिः वृद्धिर्भवति ततः उपसर्गादृति वृद्धिर्भवति ततो धाताविंत्युभयोः शेषः अतो भष्याच्चकारप्रत्याख्यानंस्पष्टमायाति आटीदित्यादौ पररूपमाशङ्कयोक्तं पररूपं गुणेनाट इति अनेनैव सिद्ध उस्यो माङिति न

SGDF
Sri Gargeshwari Digital Foundation

वक्तव्यंभवतीति सदो माङोरुसि तत्सममिति बहुश्रेयस्यै इत्यादौ वृद्धिस्तु इति से पररूपे निषिद्धे प्रतिबन्धकाभावाद्वृद्धिरेचीत्येव अत्र पक्षे आणूनद्या इति वक्तुं शक्यः अटश्चेतिचकार ओमाङोश्चेति चकार उस्योमाङ्ङिति पररूपनिषेधार्थं च वार्तिकं नाश्रयणीयं भवति अटश्चेत्यत्र भाष्यरीत्या तु आट इति वक्तुश्चकारेण पररूपवारणे सिद्धे उस्योमाङ्ङिति न कर्त्तव्यं धात्वपकर्षेणाटश्चेत्यस्यापकर्षणाप्राप्त्या आणूनद्या इति दीर्घोच्चारणमावश्यकं वृद्धिरेचीति बाधित्वा पररूपापत्तेः । न चाड्विधानसामर्थ्यात्पररूपाभावः शङ्क्यः आणूनद्या इति वक्तव्यं नाङ् इति गौरवान्न कर्त्तव्यमित्याह केचित्तु वा सुप्यापिशलेरित्यत्रापिशलिग्रहणेनैव सिद्धे वा ग्रहणमट इत्यत्रानुवृत्त्यर्थम्व्यवस्थितविभाषार्थं तेनास्वपो हसन् बहुश्रेयस्यै इत्यादिसिद्धं धात्वपकर्षो वृद्ध्यर्थं चकारकरणं दीर्घोच्चारणमाट इति न कर्तव्यमेव एवञ्चाट्स्याटोर्दीर्घोच्चारणमाणूनद्या इत्यत्र दीर्घोच्चारणमप्यनावश्यकमेव व्यवस्थितविभाषया सिद्धेः यद्वा शरावयवाङ्गुल्यादौ हस्तपादाङ्गुलिरित्यादिरूढव्यवहाराद्याटस्याटोष्टकारोकारस्याप्यवयवइत्यट् इति वृद्धिः सिद्धैवेत्याहुः न चाडजादीनामिति छन्दसि हलन्ते अपुनहूआवित्यादौ दीर्घार्थमिति वाच्यम् । छन्दोर्थे वहुलं दीर्घो दृश्यते तद्यथा पुरुषो नाह इति भाष्ये समाधानात् । न चेणस्त्योर्लेङिं झौ इणोयणिति यणि श्नसोरल्लोपे अटि आयन्नासन्निति न सिध्येदिति वच्यम् । इणस्त्योरन्तरङ्गतः इडागमेऽट इति वृद्धौ नास्ति दोषः इणो यणित्यत्रैरनेकाच इत्यत एरित्यपकृष्टः श्नसोरल्लोप इत्यत्रादिति तपरकरणात् पश्चाद्यणलोपयोरप्राप्तेनचागमेऽपि वार्णादाङ्गमिति न्यायात्प्रागेव यण्लोपौप्राप्नुतः इत्याड्वचनमिति वाच्यम् । इणस्त्योरन्तरङ्गतइति भा-

SGDF
Sri Gargeshwari Digital Foundation

ष्याच्छ्वोः शूडिति स तु क्वनिर्देशाच्चेयमनित्याऽन्यथा गत्वा च्छस्य शादेशे तुको ऽप्राप्त्या सनिर्देशो व्यर्थस्स्यादिति भाष्ये ध्वनितम् ३१ भूवादयोधातवः क्रियावाचिनः किम् याः पश्यति न चास्य वाशब्दस्य लाक्षणिकत्वान्न धातुसंज्ञेति वाच्यम् भ्वादिषु लाक्षणिकानामपि अञ्चत्यादीनां दर्शनेनैतद्विषये तत्परिभाषाया ऽप्रवृत्तेः नकारजावनुस्वारपञ्चमौ झलि धातुषु शकारजस्सकारश्चेर्षाट्टवर्गस्तवर्गज इत्यभियुक्तोक्तेरिति मनोरमोपरि शब्दरत्नग्रन्थः अत्रायं पूर्वपक्षः धातुसंज्ञाम्प्रति अनुस्वारसवर्णादीनामासिद्धत्वेन प्रतिपदोक्तस्यैवासम्भवे न लाक्षणिकपरिभाषयया पशयतीत्यत्र दोष इतिशब्दरत्नग्रन्थो ऽसङ्गतः किञ्च क्रियावाचिनः किमित्यस्य वाकरोति वाभवतीत्येव प्रत्युदाहरणं सम्भवति वा शब्दस्य धातुत्वे ऽधातुरितिनिषेधात्प्रातिपदिकत्वाभावे सुपोऽनुत्पत्त्या पदत्वाभावातिङ्ऽतिङ इति निघातो न स्यात् अत्र समाधानम् अर्थवत्सूत्रे ऽधातुग्रहणस्य त्यागेन वा करोतीत्यावदोषः न चाहान्नित्यस्यापि प्रातिपदिकत्वेन लोपापत्तिरिति वाच्यम् । न लोपो ऽतिङ इति न्यासेन वारणात् राजीयतीत्यादौ तु न दोषः प्रत्यासत्या तिङन्तानिरूपितं यस्य पदत्वं तन्निमित्तात्परस्य लोप इत्यर्थाद्रामानित्यादौ तु नलोपो न अन्यथा तस्माच्छसो लोपः इत्येव ब्रूयादिति पण्डिताः । वस्तुतस्तु वाशब्दे निपातसंज्ञाप्राप्ता धातुसंज्ञाया बाधिका भविष्यति धातुसंज्ञा भवतीत्यादौ चरितार्था निपातसंज्ञा चाह भृप्रतिषु चरितार्था वाशब्दस्य परत्वान्निपातसंज्ञैव या परा ऽनवकाशा चेत्याकडारादेकेत्यत्र सूत्रे ऊकालसूत्रे च भाष्ये प्रसिद्धत्त्वात् अन्तरङ्गत्वं तु भ्वादिवादिगणसापेक्षत्वेनोभयोः संज्ञयो सममेव गणोपस्थितशब्दबाहुल्येन व-

SGDF
Sri Gargeshwari Digital Foundation

हिरङ्गता तु धातुसंज्ञाया एव भुवश्च महाव्याहृतेरित्यत्र महाव्याहृति ग्रहणात् यावत्पुरानिपातयोरित्यत्र निपातग्रहणाच्च निपाते प्रतिपदोक्तव्यवस्थेति मनोरमादिग्रन्थकाराशयः । प्रातिपदिकसंज्ञाया निपातसंज्ञा बाधिकैवाविरोधात् निपातः प्रातिपदिकमिति विशेषवचानात् रामानित्यादौ सस्य लोपस्तु न कृतः सस्य नत्वे नलोप तस्यासिद्धत्वाद्राममासयतीत्यादौ दीर्घाभावे तुको भावार्थत्वात्तस्येति अथ धातुग्रहणप्रत्याख्याने यद्याग्रहस्तवास्ति चेत्तर्हीत्थं न्यस्यतां नलोपः प्रातिपदिकान्तस्येति तावतापि मात्राद्वयलाघवादिति तत्वप्रकाशिकायां स्पष्टम् ३२ अचःपरस्मिन्पूर्वविधौ अत्र शेखरः अत्र सूत्रे प्रयोगेऽचस्थानिक इत्यर्थो न तु सूत्रे स्थानित्वेनोद्देश्यताचस्थानिक इत्यर्थस्तेन णिलोपादेरनेन स्थानिवत्वं सिध्यति अत एव चङ्परनिह्रासे ण्यन्ताणिचि अबीभवदित्यादिसिध्यर्थो निषेधः सार्थकः इति जुहुव इत्यत्र शेखरोक्तप्रयोगः परनिपित्तकत्वाभावे ऽपि शपः परनिमित्तत्वेन परम्परया लोपनिमितत्वेन स्थानितया ऽत्रादेशस्याभावेन् स्थानिवत्वाभावाच्छब्त्वमाश्रित्य न गुण इत्युक्तम् तत्पूर्वापरविरुद्धम् वस्तुतो ऽकारस्यैव श्लुत्वेन स्थानिवत्वस्य दुर्वारत्वादिति पण्डिताः तत्रेत्थं विरोधपरिहारः साक्षात्परनिमित्तकता तत्र प्रायोगिकस्थानिता परम्मरया प्राप्तायां सौत्रस्थानितेति एवमेव हि प्रयोगाणां गतिर्भवति नान्यथेति वोध्यम् । यत्तु त्रेरित्यत्र स्थानिषत्वेन उपात्ताचस्थानिसत्त्वाच्चङ्परनिह्रासे इति वचनं वारि आख्यादवीव इत्यादौ चरितार्थमतः सूत्रे एवाच्स्थानिक इत्युक्ते सर्वेष्टसिद्धि रित्युक्तम् । तन्न । टिपदेनाच एव ग्रहणादत्रादेशाभावेनादोषात् अत एव मरुतमाचष्टे मारयतीति वृद्धौ कृतायां न स्थानिवद्भाव इति दिक् ३३

इत्युत्तरपक्षावली समाप्ता।

SGDF
Sri Gargeshwari Digital Foundation

ಪುಸ್ತಿಕೆ ಸಂಖ್ಯೆ.........................

SGDF
Sri Gargeshwari Digital Foundation

SRI CHAMARAJENDRA SANSKRIT COLLEGE
LIBRARY

This book was loaned on the last date mentioned below and it is returnable within a fortnight therefrom unless the loan is renewed.

1641-36 B.P.

SGDF
Sri Gargeshwari Digital Foundation

सूचीपत्रम् ।

		रु.आ.पा.
१	परिभाषेन्दुशेखरः । भैरवीव्याख्यासमेतः । ...	१-०-०
२	अर्थसंग्रहः । सटीकः (मीमांसा)	१-०-०
३	षड्दर्शन मूलमात्र ऐकत्र	१-०-०
४	पदार्थदीपिका (न्यायः)	०-८-०
५	भाट्टभाषा । प्रकाशसहिता (मीमांसा) ...	०-८-०
६	प्रश्नवैष्णवः (ज्योतिषः)	०-४-०
७	प्राकृतप्रकाशः । वररुचिकृत सूत्राणां भामहकृतव्याख्या	०-८-०
८	वृद्धिदीपिका (धर्मशास्त्रम् आशौचकाण्डम्) ...	०-२-०
९	धातुपाठः ।	०-२-०
१०	भगवद्गीता । मधुसूदनटीका सहिता । ...	२-०-०
११	व्युत्पत्तिवादः । मूलम्	१-८-०
१२	भैरवी । शब्दरत्नव्याख्या (कारकान्ता) ...	२-८-०
१३	परमलघुमञ्जूषा ।	०-४-०
१४	लघुशब्देन्दुशेखरः सम्पूर्णः ।	४-०-०
१५	लघुशब्देन्दुशेखरोऽव्ययीभावान्तः । ...	१-०-०
१६	मनोरमा शब्दरत्नसहिता सम्पूर्णा	५-०-०
१७	मनोरमा शब्दरत्नसहिताऽव्ययीभावान्ता । ...	१-८-०
१८	किरात ३ सर्ग ।	०-४-०
१९	साङ्ख्यतत्त्वकौमुदी ।	०-६-०
२०	नारदसंहिता (ज्योतिषम्) ।...	०-६-०
२१	मेदनीकोषः ।	०-१२-०
२२	शास्त्रसिद्धान्तलेस पत्रात्मक	२-०-०
२३	उत्तरपक्षावली ।	०-२-०
२४	मीमांसापरिभाषा ।	०-४-०
२५	कारिकावली । राम० दिन० मुक्ता० स० शब्दखण्डान्ता	३-०-०
२६	कालीशङ्करी जगदीश्याः पञ्चलक्षण्याः । ...	०-२-०
२७	सैव—माथुरी पञ्चलक्षण्याः ।	०-२-०
२८	परिभाषापाठः ।	०-०-६

पत्रादिप्रेषणस्थानम्—हरिदासगुप्तः—कार्याध्यक्षः
चौखम्बा संस्कृत सीरीजकार्यालय-बनारससिटि ।

SGDF
Sri Gargeshwari Digital Foundation